
शि खा

(उपन्यासः)



विद्वन्मणिः
डा० केशवचन्द्रदाशः

लोकभाषाप्रचारसमितिः, पुरी

शिखा

(उपन्यासः)

●

लेखकः—

डा० केशवचन्द्रदाशः

अध्यक्षः, न्यायदर्शनविभागः,

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,

श्रीविहारः, पुरी-752002

●

प्रकाशिका—

लोकभाषा-प्रचार-समितिः,

शरधाबालि, पुरी-752002

●

प्रथमसंस्करणम्—1994

●

राष्ट्रियसंस्कृतसंस्थानस्य अर्थसाहाय्येन

प्रकाशितोऽयमुपन्यासः

●

मुद्रकः—

श्रीनारायणप्रेसू, बालिसाहिः, पुरी।

●

मूल्यम्— रू०

शिखा ते वर्धते वत्स !

गुडूचीं श्रद्धया पिब ।

(तैत्तिरीयोपनिषद्, ब्रह्मवल्ली-२३)

शिखा

अहरहो विरहः ।

अविरता विरुतिः । आलोके न पुलकम् । कामना लीना···· विलीना—। वासना विवसना । दृश्यानि साक्षात् धूसरभूषणानि । मनो वनभूमिरेव ।

'तथापि तव नवनवनीततनुरेका ललितलता, रजनि—!'

रजनी चिन्तयति । परमाश्रयः कुत्र ? आश्रयो नापेक्ष्यते । आलय आवश्यकः । न वरणम्····अपितु शरणमपेक्ष्यते । किं चरणरेणुः ? तदेव शरणम् ? न शरणम्····अपितु सरणिः । आलय-निमित्तं मार्गः । आलये सहलय····सहलये महालयः—।

'पितृलोकं परित्यज्य आगता ये महालये – उज्ज्वलं ज्योतिषां मार्गं प्रपश्यन्तु व्रजन्तु ते'—कुलमणिः दीपार्पणे मग्नः । कुलमणिः कुलीनः । सः शेषवयोनिवासी । वसने तस्य परम्परा । आसने संस्कृतिः । अशने प्रकृतिः । व्यसने विकृतिः । शयने स्वप्नो जागतिकः । चलने विश्वासो भौतिकः । स हि जनकः । पुत्रो 'विलासः' । कन्या 'रजनी' । किन्तु स विपत्नीकः । बाल्यसखी इदानीं तु मस्तकस्य शिखा ।

अपरा सखी इयं दीपशिखा ।

अद्य देहे न उत्तेजना । न इन्द्रिये शक्तिः । स्मृतितले समयस्य चपलता । सरलकुटिलपथे अतीतलहरी । अभितो जीवनम् । न सत् । न असत् । न सदसत् । न वा सदसद्भिन्नम् । केवलं प्रभिन्नम्····।

कुलमणिनयने इदानीं न सा प्राचीनकुटी। परितः प्रासादाः। वृक्षतले न छाया, न वा देवता। सर्वत्र उच्छिष्टस्तूपाः। नदीधारे न पुण्यतोयम्। अपितु शिल्पानां वर्जितम्। पवने न सुरभिः। केवलो धूमः। उत्तापो भवति। परं कर्दमं न शुष्यति। वृष्टिः भवति। किन्तु दूषितं न प्रधूयते।

— मुर्म्मो—! मुर्म्मो—!

मुर्मुः सद्य उपस्थितो भवति। नित्यनैमित्तिकं प्रस्तौति। करणीयं पृच्छति। कुलमणिः शान्तो भवति। चिन्तान्तराले जृम्भते मुर्मोः इतिहासः—

महादेवमन्दिरनिकटे तद्दिने मुर्मुः रुदन् आसीत्। निकटे तस्य मातृशवः। यायावरी सा गिरिजनः। कमनिमित्तं ग्रामाञ्चलमागत्य मन्दिरस्य पश्चात् वसतिमकरोत्। मुर्मुः पितरं न दृष्टवान्। माता एव तदर्थं सर्वमासीत्। अज्ञातरोगे सा शेषश्वासं परित्यक्तवती। दिनत्रयं यावत् शवः तस्याः तत्रैव पतति। तन्निकटे मुर्मुरपि तथा उपविशति। यदा क्षुधा बाधते तदा मुर्मुः प्रसादनिमित्तं मन्दिरमागच्छति। तद्दिने कुलमणिरपृच्छत्।

— किं—रे—! किमर्थं विषण्णः?

— भगवन्! मम माता अस्वस्था।

— कदा प्रभृति?

— दिनत्रयतः—

तत्क्षणमेव कुलमणिः मन्दिरस्य पश्चात् आगतः। पूतिमयं शवं विलोक्य स स्तब्धः। ततः त्वरया संस्कारनिमित्तं सर्वमायोजितवान्। चिताशिखायां मुर्मुः ग्रासस्यैव चिह्नं विलोकयति स्म। यदा शिखा अवनता तदा मुर्मुः उच्चैः आक्रोशत्।

— भगवन्! मातरं मे भस्मसात् कृतवान्?

कुलमणिस्तु गम्भीरभावेन स्मरति—'नैनं दहति पावकः। पावकः पुनाति एव।' मुर्मुः कातरभावेन तस्य चरणे शरणं गृह्णाति। तत्र मस्तकं निधाय विलपति—'भगवन्! मातरं मे प्रत्यर्पय—। प्रत्यर्पय भगवन्—!' कुलमणिस्तु गम्भीरभावेन तम् उत्थाप्य प्रत्यावर्त्तत।

मुर्मु धृत्वा प्रतिष्ठते कुलमणिः। मुखे चिन्ताया गंभीरस्पर्शः। पश्चात् चिताया अवशेषः। परितः तस्य पादुकाशब्दः साक्षात् कालस्य अट्टहासः।

तदनु मर्मुः सेवकः···पुत्रः···।

दिननेपथ्ये इत्थं जीवनकथा अतीतग्रस्ता। विषयविस्तारे मुर्मुः अद्य वयस्कः। परिवारे स आत्मीयः। लघुसमाजे च अविच्छिन्नसदस्यः।

—तदा प्रभृति मुर्मुः भ्राता। रजनी भगिनी। कर्मपरिसरः कुलमणेः निर्देशः। आशामूले प्रगतिः। विश्वासे श्रीकृष्णरतिः। समस्यायाः अन्तःकरणे तथापि निगूढ़ा संसारप्रीतिः।

विलासो वणिक्।

वाणिज्यनिमित्तं तस्य गृहसम्पर्कः छिन्नः। पिता कुलमणिः तन्निकटे दैन्यस्य उपासकः। दरिद्रता तदर्थं विलासः। अभावमूले ईश्वरो महीयान्। अभाव एव शान्तये मार्गं निर्माति। अभावे जन ईश्वरमुपास्ते। शान्तिं लभते। आधितो मुक्तिं प्राप्नोति। अतः अभाव आवश्यकः। किन्तु विलासः अस्यैव मनोभावस्य विरोधी। तत्कृते तु अर्थनीतिरेव जीवनस्य मानदण्डः। यदि अर्थनीतिः न सुविन्यस्ता तर्हि सर्वाऽपि नीतिः वृथा। एतदर्थं विलासः बाल्यात् वाणिज्यप्रणयी। वाणिज्ये हि वसति लक्ष्मीः। अद्य जनपदे विलासः प्रसिद्धो वणिक्। स मान्यः गण्यश्च। स नेता। सकलकर्मणि च जननायकः। अतः यत्र निवासः तत्र गृहम्। जन्मगृहं तु अख्यातग्रामे, यत्र पिता कुलमणिः शीर्यते, यत्र मूर्खमुर्मुः प्रतिदिनं घासं संगृह्णाति···काष्ठानि आहरति···गाश्चारयति···सायंकाले च वृद्धं सेवते। यत्र च रजनी अद्यापि विधवा—।

रजनी विधवा··अशुभदर्शिनी···पूर्वजन्मनो दुष्कृतिनिमित्तं सैका अभिशप्तसैकतशय्या····। एकस्मिन् गृहे रजनी-कन्या—भगिनी-जाया···जननी-। अद्य जगति तदर्थं न किंचिदपि वर्त्तते द्रष्टुम्—श्रोतुम्—स्वादयितुम्—उपभोक्तुं वा—। जरज्जनकस्य भुजच्छायातले सैका प्रत्यूषतारका···कियत्क्षणकृते आविर्भूय पुनस्तिरो भविष्यति। सा कन्या गृहस्य···। भगिनी साधारणजनस्य—। जाया प्रेमपुरुषरसेश्वरस्य···। जननी जीवमात्रस्य····।

किन्तु सरलकामनातले रजनी तथापि एका ललितललना---। मनसि तस्याः प्रच्छन्ना अभिलाषा अनेके। कर्मप्रेरणायां कृत्यं बहु----। आस्वादन भावनायां पृथिवी बहुरूपा---। ममत्वचेतनायाँ दिवसाः विचित्रवर्णाः---। परमद्य अश्रुधारे तस्या न परमपुरुषः--न वा परपुरुषः----अपितु केवलः पुरुषः यः आगत आसीत् किंचित् निजत्वं वहन्---किंचित् ममत्वं परिपोषयन्---किंचित् ऐकात्म्यं द्रढ़यन्----।

घटना तु घटते। एतस्याः प्रतिरोधः अवरोधो वा सर्वमत्र घटनैव। सर्वश्च घटनावशः। इत्थं घटनाप्रवाहे स पुरुष आगतः विगतोऽपि। रजनी तु साक्षिणी। सा प्रतिभूः मनाक् उच्छिष्टस्य---- मनाक् परिशिष्टस्य--मनाक् अवशिष्टस्य----।

अग्रे परिशीलनाय परिसरः प्रशस्तः। अवसरश्च पुष्कलः। परं को लाभः? कर्मपरिसरे सम्प्रति पितुर्निर्देशः। शांतिनिमित्तं पूजा----उपासना---उपवासः----। रजनी समाजविकला। सम्मुखे तस्या अद्यत्वे सहयायिन्यः सौभाग्यवत्यः। तासां वसने भूषणे च प्रतिदिनं रङ्गविचित्रा। व्यवहारे च नवीना भङ्गी। वचने नाना कथा प्रपञ्चिकाः। अहंकारे सामाजिकी प्रतिष्ठा लक्ष्यनिगूढ़ा। अभिमाने मातृत्वगौरवं विषयविपुलम्। आभिजात्ये दाम्पत्यस्य परिवर्त्तितशैली सान्द्रा।

शम्पा एका सैकतरेखा।

समाजे सा सम्मानिता सौभाग्यवती। सा शिक्षिता---- सभ्या। संसारस्य वार्त्ता तदर्थं मुक्ता। बहुजनसम्पर्कः तदर्थं मधुपर्कः। सा नेत्री परिवारस्य। उन्नेत्री परिवेशस्य अभिनेत्री पारिपार्श्विक सम्पर्कस्य।

तस्याः समतलप्रवृत्तिप्रसरे नाना पदचिह्नानि------विभिन्ना आकृतयः----अगण्याः प्रतिमाः------अतुलानि रूपाणि--पुनश्च मधुर-सम्बोधनानि---। तथापि उच्चारणकलायां तन्निकटे प्रहेलिका अर्थस्य ललितनिह्नुतिः; किन्तु परिचितनामानुक्रमणीषु तस्याः प्रियतम 'निशान्त' इति श्रद्धानाम।

निशान्तः विलासस्य बन्धुः।

दाम्पत्यस्य अभिषेकनेपथ्ये निशान्तः चतुरो लिपिकः। तस्य प्रथम-सेवावृत्तिः राज्यस्य सचिवालये। अतः राज्यस्य नीतिविषये स

निष्णातः । जनानां भाग्यविषये स भविष्यद् वक्ता । स जानाति, अत्र केन प्रकारेण धनमागच्छति । केन प्रकारेण च शासनं प्रचलति । धनोपार्जनमार्गः तन्निकटे सरलः । इतस्ततो विक्षिप्तपुस्तिकासु हि स राज्यस्य भाग्यलिपिं नियमिततया पठति । अतो जनान् असौविध्ये निक्षेप्तुं स कौशलं जानाति । तदपि कार्ये सम्यक् रूपयति । धनमुपार्जयति । जनान् शोषयति । राज्यं दूषयति । निजकार्यमपि कलुषयति । अनेन स आनन्दं लभते । समृद्धचां समेधते नगरे क्षेत्राणि क्रीणाति । गृहाणि निर्मापयति । यानेन गमनागमनं करोति । तन्निकटे नीतिदुर्नीत्योः पार्थक्यं नास्ति । तस्य समग्रमनोवृत्तिषु जनानाम् असौविध्यसृष्टिरेव संकल्पः । जनपदस्य विलासपूर्णेषु अट्टशूलेषु वणिग्-बन्धूनां सम्मेलने रात्रियापनं तस्य जीवने महीयसी धारा । वृत्तिः सचिवालये । भोजनम् अट्टशूले । निजगृहाणि तु भाटकीयानि । न पत्नीचिन्ता, न वा निजचिन्ता····। अवधाने केवलः सचिवालयः । आदिमधारायां कुलमणिः पेचकावतारः ।

अनुभवे तस्य दूषितदिवसाः । तथापि निष्ठायां सः अचलः । कौलिक-जीवनधारायां नितरां विश्वासी । सरललक्ष्ये तस्य यथाकथंचित् समस्यायाः समाधानमेव प्रतिज्ञा । विश्वासे प्रगाढ़ा कृष्णचेतना । पापपुण्यमूल्याङ्कने स सामाजिकः । सकलप्रतिज्ञायां सत्यमेव तस्य व्रतम् । आत्मविश्वासे पारिवारिकी शान्तिरेव तत्त्वसूची ।

तद्दिने स कुम्भमेलातः प्रत्यागतः । सर्वे वृद्धप्रतिवेशिनः तमुपगताः । गङ्गामाहात्म्यविषये चर्चा अभवत् । प्रत्येकः अपृच्छत् ।

— किं गङ्गाजलमानीतं वा ?

कुलमणिः सविश्वासं सगर्वं च अवदत् ।

— कुम्भपूर्णमानीतम् ।

— तर्हि, स्तोकं दीयताम् ।

कुलमणिः गङ्गाजलं सानन्दं व्यतरत् । वृद्धाः प्रसन्ना हृष्टाश्च अभवन् ।

— अहो····भवतो भाग्यम्····!! अस्मासु भवान्नेव पुण्यवान् । वयं पापात्मानः । पूर्वजन्मनि कानि दुष्कृतानि आचरितानि, न जानीमहे —। गङ्गाया दर्शनमपि न कृतम् । भवतु —, भवान् भाग्यवान् इति वयमपि भवदीयभाग्यभोगिनः ।

समयेऽस्मिन् विलास उपस्थितः । अतिशयं च अकुप्यत् ।

— किमानीतम् ·····? कुम्भमितं जलम् ···? कुम्भमितजलनिमित्तं सहस्रत्रयं व्ययितम्। किमनेन पापानि धौतानि ? पापात्मा भवान् पुण्यात्मा संजातः ? किं मम सर्वमपि अर्जितम् अनेनैव मार्गेण व्ययीभविष्यति ? को लाभः अत्र ? यदि सहस्रत्रयं मन्निकटे अस्थास्यत् तर्हि व्यापारे मे महान् लाभोऽभविष्यत्। लाभांशेन व्यापारान्तरमपि अकरिष्यम्। नाऽहम् इतःप्रभृति किंचित् दास्यामि। भवान् निजयोजनां करोतु। निजवृत्त्या च जीवनं निर्वाहयतु।

कुलमणिः अगर्जत्।

— धूर्त्त ···! निशाचर····! इयान् ते साहसः ? किमहं ते वाणिज्यस्थली ·····? किमहं ते उत्पादनशीला शिल्पसंस्था ? अथवा ते वचस्करः ? यत्त्वं वदेः तदहं करिष्यामि ? नय ते धनम्। त्वत्तः जलमपि ग्रहीतुं नेच्छामि। याहि ···, शीघ्रं गृहं परित्यज। अद्य प्रभृति न ते स्थानमिह। गच्छ ···, वाणिज्यभूमौ निवस। तत्रैव धनसंचयं कुरु।

पितापुत्रयोः कलहे रजनी सहानुभवविधुरा। म्लानमनोमूले तस्या असंयतस्वप्नानां समष्टिः। उद्यतचिबुके स्थिरतरङ्गः। सम्मुखे गङ्गाजलस्य पुण्यतायां पुनः वियोगस्य पूर्वरङ्गः। मङ्गलमहोत्सवस्य आयोजने पिनाकिनो धनुर्भङ्गः साङ्गोपाङ्गः।

पापपुण्यविचारे मुर्मुः मर्माहतः। कलहे दोषमन्विष्य स प्रश्नपशुः—कुत्र दोषः ? गङ्गाजले ···? धनव्यये ···? धनसंचये····? अथवा परोपजीवने ?

तदा प्रभृति विलासः प्रवासी।

जीवनधारा निजानुमता। कर्मश्रीः स्वैरिणी। वचने वैपणीकता। व्यवहारे आपणिकस्य मधुपर्कः। सम्पर्को न ऐकिकः। धनाय स सतर्कः। व्यापारे सर्वोऽपि ग्राहकः। न तत्र गृहम्। न परिवारः। न बन्धुः, न वा कश्चित् आत्मीयः। सर्वोऽत्र पारिपार्श्विकः···केवलो व्यक्तिकैन्द्रिकः।

विलासस्य गमनतः परं रजनी अवसन्ना। पुनर्विवाहस्य आशा तस्या मलिना। भौतिकी इच्छाऽपि अवदमिता। प्रवृत्त्यग्रे सम्प्रति दण्डायमाना गृहदेवता। आरतीशिखातले छायाप्रतिमः वृद्धपिता। द्वारदेशे मङ्गलशङ्खध्वनने मग्नः मुर्मुः। निजकरे तस्या मङ्गलारती।

अंगुल्यग्रे आरत्रिकतैलम्। निमीलने ज्वलत्शिखा। उन्मीलने शुष्क-वर्त्तिका।

ममकारे मुर्मुः मार्मिकः।

स्नेहसाहित्ये तस्य रजनी एका मुग्धा माधवी। वैधव्येऽपि व्यवहारेण सा विदग्धा वधूः। पितुरभिधाने समस्या तस्या वैधानिकी। परं मुर्मोः निर्बोधबोधे विधिरयम् असाधुः।

एकदा स कुलमणिमपृच्छत्।

— पितः! किमर्थं भगिन्या पुनर्विवाहं नायोजयति? कुलमणिः विषण्ण-भावेन अवदत्।

— वरः कुत्र—?

— अहमन्वेषयिष्यामि।

— तर्हि, अन्वेषय—।

— यदि मिलेत्—।

— तर्हि, अचिरं सम्पादयिष्यामः।

मुर्मुः विस्मितः। स ज्ञातुं न प्रभवति—किमर्थं वृद्धोऽयं निजपुत्रविलासं वरान्वेषणतो वारयति। कथं च सेवकं कार्येऽस्मिन् अनुमोदयति। तथापि तदा प्रभृति मुर्मुः रजनीनिमित्तं वरमन्वेषयति। अन्वेषणे तस्य अनेके धनिनः। बहवः सुन्दरपुरुषाः। नैके राजपुत्राः। किन्तु न कोऽपि उपयुक्तो दृश्यते।

एकदा कुलमणिः तमबोधयत्।

— अरे—मुर्मो! त्वमपि निर्बोधः। विधवां कोऽपि परिणयति वा? किमर्थं वृथा भ्रमसि? अद्यत्वे तु अविवाहिताः कन्या विधवा इव जीवनं नयन्ति। यदा अनूढ़ानाम् एतादृशी दशा तर्हि विधवां को वा पृच्छेत्? वैधव्यम् अभिशापः। प्राग्जन्मनः दुष्कृतेः परिणामः।

— अभिशापस्य किं निवृत्तिर्नास्ति?

— सम्भवेत्। किन्तु—?

— कोऽयमुपायः—?

— उपायः—उपासना। भगवति भक्तिः। प्रवृत्तेः निरोधः। पुनश्च संस्कारः—।

— कस्य संस्कारः ?

— जनस्य, देशस्य, जातेः, समाजस्य, तव मम च ।

— भवान् तु सर्वं जानाति । किमर्थं न करोति ?

कुलमणिः गम्भीरोऽभूत । मनसि संलग्नानि संस्कारस्य विधानानि किन्तु स सहसा विहस्य अवदत् ।

— अरे — ! प्रथमतः गृहस्य संस्कार आवश्यकः । तदनन्तरं देहस्य····।

मुर्मोः अल्पप्राणमनस्तत्त्वे संस्कारपद्धतिः साक्षात् अरण्यस्य निष्क्रमविशालता । स किंचित् विशङ्कमानः अपृच्छत् ।

— गृहसंस्कारः केन प्रकारेण भवेत् ?

— सत्येन —।

— किमिदं सत्यम् ?

— निर्मल भावः ।

वचनेऽस्मिन् मुर्मुः द्विधाग्रस्तः । अवबोधे तस्य न किमपि प्रत्यफलत् । निजमूर्खतां धिक्कृत्य स पराङ्मना अभूत् । कुलमणिः मनाग् विहस्य तस्य पृष्ठे करमचालयत् । क्रमशश्च निजवक्षसि तस्य मस्तकं न्यवेशयत् । केशोपरि करं संचाल्य अवदत् ।

— वृथा मा चिन्तय····। त्वं मम पुत्रः । बाल्यात् त्वं मदंके परिवर्धितः । आवयोः पार्थक्यमिह गौणम् । अधुना ते शिक्षणस्य वयः । गृहमिदं शिक्षणस्य मुख्यस्थानम् । अत्र द्विधावसरः नास्ति । किमर्थं त्वं हीनमनाः ?

अपूर्ववात्सल्ये मुर्मुः नितरां प्रसन्नः । अनुभवे तस्य परमाश्वस्तिः । नयने तु आनन्दाश्रु—'न कोऽपि कस्मै किंचित् ददाति, केवलो व्यवहारः··· परस्परकृते सेवामनोभावः । किंचित् त्यागः । साधारणं च आनुगत्यम् । साहाय्यनिमित्तं कृतज्ञता । अनुज्ञानिमित्तं च मनाक् प्रस्तुतिः । अननुमतस्यापि किंचित् स्वीकृतिः । एतत् सर्वं तु स्नेहबन्धनम्— ।'

मुर्मुः चिन्तयति । कुलमणिश्च बोधयन् प्रवर्त्तते । समयेऽस्मिन् पूजां समाप्य उपगता रजनी । सा सामान्यमहसत् ।

— अरे — मुर्मो····! किमनुदिनं बालः संजायसे ?

रजनीवचनं निशम्य मुर्मुः कुलमणिवक्षसो मुखमपानयत्। अपूर्णयुवकस्य सुलभवचसा सः अवदत्।

— किमयं तवैव पिता ? न मम—?

रजनी स्फुटमहसत्। प्रसादं समर्प्य आदिशत्।

— अरे ···याहि —। काष्ठानि आहर। अन्यथा अद्य पाकरोधः।

रजनी अन्त. प्राविशत्।

मुर्मुः काष्ठानि आहर्त्तुं गृहोद्यानमगच्छत्। आहरणसमये बहिः कश्चित् शब्दापितवान्।

— मुर्मो···! मुर्मो !

मुर्मुः अपश्यत्—वृतेः अपरपार्श्वे दण्डायमानः प्रतिवेशिनो भृत्यः 'मेघुः'। मुर्मुः तमुपागच्छत्। मेघुः आकारितवान्।

— वृतेः अपरपार्श्वमागच्छ···।

— नहि···। किं वदसि···वद···।

— अद्य अहं गच्छामि।

— कुत्र ···?

— गृहम्।

— किमर्थम् ?

— अद्य प्रभुपत्न्या सह कलहोऽभूत्।

— किमर्थम् ?

— सा तु सर्वदा मां ताड़यति, भर्त्सयति, यस्मिन् कस्मिन्नपि कर्मणि निन्दति, जुगुप्सते अपि।

— एतदर्थम्···?

— नहि —। अद्य अहं क्रुद्धः। सा मां बहिष्कृतवती।

— तर्हि, गृहं गत्वा किं करिष्यसि ?

— अन्यत्र कुत्राऽपि कर्मान्वेषणं करिष्यामि।

मेघुः प्रस्थितः। पुनश्च भृत्यवृत्तिः··· पुनः ताड़नम्·····एवं विचिन्त्य मुर्मुः स्कन्धे काष्ठानि निधाय पाकशालासमीपमागतः। काष्ठानि संस्थाप्य किंचित् त्वरया अवदत्।

— भगिनि····! भगिनि····!

देहलीमाश्रित्य साक्षात् दण्डायमाना रजनी अपृच्छत् ।

— किमभवत् ···?

— अद्य मेघुः गृहं प्रत्यागतः ।

— किमर्थम् ···?

— तस्य प्रभुपत्नी तं ताड़ितवती ।

— तर्हि, स नूनं किमपि अननुमतं कृतवान् ।

— एतदर्थं बहिष्कृतवती ?

— हूं ···। किं वा अकरिष्यत् ?

— एकमेकदा मामपि त्वं बहिष्करिष्यसि ?

रजनी अहसत् ।

मुर्मुः सरलरीत्या अवदत्

— तस्य गृहमस्ति । स तत्र गमिष्यति । मम तु तदपि नास्ति । अहं कुत्र गमिष्यामि ?

— अरे···! इदं तु तव गृहम् । एतद् विहाय अन्यत्र गमनाय का आवश्यकता ? स तु अपरगृहे आसीत् । अतः निजगृहं प्रस्थितः । तव तु एतदेव सर्वम् । अन्यथा कथं चिन्तयसि ?

रजनी निष्क्रान्ता । मुर्मुः वृद्धपितरमन्विष्य बहिर्गतः ।

रजनीमनसि पूजापरपवित्रता । सम्पूर्ण गृहस्य ऐकिकविजनतायां तस्या भावना तु राजसिकी । तत्र पुनः पुनः शाश्वतीभवति राधामाधवयोः विरहाकृतिः । उभयोर्मध्ये रहस्यमयः कश्चित् उपलपथः । पथि अस्मिन् कथामयं प्रियस्य पाथेयम् । कति संकेताः····। कति च चिह्नानि । तदनन्तरं चरणाङ्कः··· एकः··· द्वौ··· बहवः···। पुनरपि अन्तराले आध्यासिकी आकृतिः । तदर्थं मोहः । मोहे च ममता । ममतायाम् अस्थिरो भवति संचितरुधिरस्य कियन्नियंसमयो बिन्दुः । तद्विमोचनाय प्रकारप्रपञ्चः । तदर्थमेका मनोवृत्तिः । काचित् शारीरिकी उद्दीप्तता । तुष्टये सृष्टये च प्रगल्भता । आत्मप्रसाराय विकल्पशून्यता । तदनु किंचित् विलीनता । ततो निमग्नभावे स्वयंकारस्य विक्लितिः ।

रजनी चूल्लिकायाम् अग्निशिखां पश्यति । धूमसम्मेलने नयने तस्या अश्रुलीला । धमनसमनन्तरं चिबुकतले श्वासराशेः स्वेदसंकेतः । पूर्णताम्बुलाकारलपने उष्णाम्बु यथा तुहिनोपलम् । एवं नित्यनैमित्तिकधूमधमने रजनीजीवनस्य कार्यशैली जलीयसी·····।

कुलमणिस्तु आवेगशिथिलः ।

पार्श्ववासिनः अग्रेसरा अभवन् । तेषामपत्यानां समृद्धिः सम्प्रति मान्या । ते च पदवीस्थाः । ते अपि अधिकारिणः। भिन्नमूल्यबोधेऽपि ते सुखिनः । तेषां भावप्रकाशे संसारो गरिष्ठः । आहरणे च प्रवृत्तिः अर्थनैतिकी । विहरणे मर्यादा भौतिकी । विनिमये स्नेहो धनवहः । ते प्रभवः । एवं विकलकलनासु कुलमणिः दुष्कुलीनः । मनसि तस्य आघातः—पुत्रः विलासः चिरप्रवासी । कन्या रजनी चिराय निजावलम्बिनी ।

का वा दुष्कृतिः तस्य प्रगतिं प्रतिरुणद्धि ? केयं वा परम्परा आग्रहे सेतुकल्पनां करोति ? किं वा सत्यं कर्मपरिसरे प्रभावं वितनुते ? अतीते तस्य नश्वरस्य शेषांशः । भविष्यद्द्वारे महाभूतानां मिश्राणुः । द्विधागर्भवर्त्तमाने अनेकान्ता प्रकृतिः । इच्छाग्रे अनेकबन्धः । तथापि लक्ष्ये मुक्तिः····। मुक्तिः पातकिनाम् ·· पुण्यवतामपि ।

शिखातले तु तमसा ।

विलासो विलासी । वणिग्वृत्तौ आभिचारिकता तस्य सरणिः । अद्यत्वे स बन्धुनिशान्तस्य गृहे अतिथिः शम्पादेवी आतिथ्यं समर्प्य उपहारं गृह्णाति । अनेनैव उभयोः बन्धुत्वं चिरतरायते । इयं च रीतिः नैकवासरिकी । परं भावबन्धनस्मारकी चिराय···चिरतराय ——····। अभ्यासगतसौजन्ये रीतिरियं शम्पानिकटे केवलं नवीभवति । विलासनिकटे आतिथ्य च तथा ।

शम्पा अपृच्छत् ।

— किमर्थमद्य विलम्बः ?

विलासः औदासीन्येन अवदत् ।

— किमस्ति अस्माकम् ? सदैव तु कार्यप्रकार एकः । पुनश्च तस्य आवृत्तिः । अतः कर्म विरक्तिकरं भवति अपनोदनाय इतस्ततो भ्रमणे विलम्बो भवत्येव ।

— अथवा अन्यदीयम् आतिथ्यं स्वीकृतम् ?

— तत्तु सर्वदा । परं निशान्तो मे आत्मीयः । हा····, बन्धो ! भवत्कार्यालये कार्यं मे स्थगितं मन्ये ।

निशान्तः कुटिलं विहस्य सामान्यसौजन्येन अवदत् ।

— तत्तु इदानीमपि न मे हस्तगतम् । अपरस्य पार्श्वे वर्त्तते । यदा आगमिष्यति तदा कार्यसमापने कियन्निमेषं वा लगेत् ? किन्तु, पश्य····, विना भोज्यं कार्यं न भवेत् ।

विलासः अहसत् ।

— अरे —! विषयेऽस्मिन् मयि अविश्वासः ?

— जाने, त्वं वदान्यः । तथापि वक्तव्यं भवति । किमर्थमिति त्वं जानासि । साधारणकार्येऽपि सरलभावेन काचित् पुस्तिका मत्त उपरि न गच्छति । यथा मदर्थं व्यवस्था तथा तत्र अनुकूलमतम् । अन्यथा को वा किं कुर्यात् ? अधिकारी तु अस्माकम् मतानि गृहीत्वा आदेशं प्रदास्यति । नोचेत् पुस्तिका तत्रैव तिष्ठेत्

— यदि अधिकारी एतादृशं कार्यं ते जानीयात् ?

— ज्ञात्वाऽपि स किं करिष्यति ? स तु अधिकाधिकं वर्षद्वयं वर्षत्रयं वा आसने उपविशेत । तदनु स्थानान्तरम् । अस्माकं कार्यनीतिषु यदि स स्नायात् तर्हि नूनं निमंक्ष्यति ।

शम्पा उभयस्य आलापे निजाभिजात्यम् अन्वेषयति । निशान्तः तथैव विजल्पति ।

— बन्धो —! उपार्जनस्य मार्गास्ते नाना । तद्द्वारा पुष्कलं विशोष्य स्वल्पानि च उपकारनाम्ना वितीर्य त्वादृशा वदन्याः स्युः । किन्तु, वयं यदि उपकरिष्यामः तर्हि अस्मत्कृते भोजनं न मिलिष्यति । अतो यावत् अपकारः तावत् उपार्जनम् । यावत् पुस्तिकाया वक्रगतिः तावल्लाभः ।

— इदं केन प्रकारेण····?

— यदि कार्ये विघ्नसृष्टिः तर्हि कश्चित् अस्मत्समीपम् आगमिष्यति । धनं दास्यति । सम्मानमपि दास्यति । ततः कार्यसिद्धिः ।

— बुद्धिमान् त्वम्····।

— बुद्धिस्तु केवलम् असौविध्यसर्जने ···।

— अरे···! येन केन प्रकारेण धनं करगतं भवतु। ततः सुखम्। तदपि सम्मानस्य मूलम्। जनास्तु असौविध्ये निपतन्ति। नेयं नवीना कथा···।

— त्यज एतत्। एषा हि दैनिकी कथा। प्रतिदिनं केचन आगच्छन्ति। बाबो···! बाबो···! सम्बोधयन्ति। अनुनयन्ति। विनीता भवन्ति। धनं ददाति। ततः किंचित् कार्यं भवति। भवतु···। का ते योजना सम्प्रति ?

— इदानीं क्वचित् महिलामङ्गलसमितेः स्थापनार्थं चिन्तयामि। सर्वकारस्य, मन्ये, इयं नवीना योजना।

— सहसा कथमस्यां दिशि दृष्टिः निपतिता ?

— किंचित् मङ्गलं विधातव्यं खलु ! अन्यथा नाम्नः प्रसारो न स्यात्।

— हा···बन्धो···! भवन्तो महान्तः। धनस्तूपस्य अधिकारिणः। यदा कदाचित् यत् किमपि कर्तुं प्रभवः। सर्वाणि मङ्गलानि महतामेव। अनेन मम को लाभः ?

— नूनं लाभो भवेत्। त्वं सचिवालयस्य विधाता। यत् किमपि भवतु तवपथि सर्वमागमिष्यति। लाभो वा न भवेत् कथम् ?

आत्मप्रौढिषु निशान्तः अहसत्।

— तर्हि, शीघ्रं व्यवस्थापय।

— व्यवस्थापने सहाय आवश्यकः।

— तर्हि, किमिच्छसि—?

— प्रथमतः शम्पादेवी समितेः कार्यनिर्वाहिका भवतु।

निशान्तः प्रसन्नः संजातः।

— तर्हि, कियद् वेतनम् ?

— आरम्भो नास्ति···। वेतनचिन्ता—?

— नोचेत् कथं भवेत् ?

— सर्वकार नियमं त्वं तु जानासि। तदनुसारं भविष्यति।

शम्पा पुलकिता। प्रभुत्वपरिकल्पनायां सा व्यग्रा अभूत्। आधिपत्यस्य आहुतिषु तस्याः कामनाशिखा आधारत उत्थातुं चञ्चलाऽभवत्। अधिकारस्य लिप्सा अभियानमुखी अभूत्।

विलासस्य कौशले शम्पा पुत्तलिका भवितुं प्रवृत्ता। निशान्तस्य पुस्तिकानेपथ्ये सैव विघ्नस्य जननी। तस्य च संग्रह-प्रवृत्तिमूले सा आभिजात्यस्य प्रथमसामग्री। शम्पा सुन्दरी। पार्श्व-वासिनां नयनाकर्षिणी। उपरितन पदाधिकारिणां पुलककारिणी। तस्या एव तारुण्य निशान्तस्य सौभाग्ये कारणम्। यदा कदाचित् उच्चपदाधिकारिणां पुत्रजन्मोत्सवो भवति अथवा गृहप्रतिष्ठा भवति तदा निशान्तः सोपहारः सपत्नीकश्च गच्छति। शम्पया सह निशांतः तदा आत्मानं बहुमन्यते। पदाधिकारिभिः सह तस्याः परिचयं कारयति। शम्पा अपि मुक्ततया आत्मानं प्रदर्शयति। तैः सह समानीभवनं पुरस्कृत्य सा तथा व्यवहारं प्रदर्शयति। प्रफल्लतया बहु जानन्तीव अभिनयति। ते मुग्धा भवन्ति। शम्पा सन्तुष्यति। निशान्तोऽपि आत्मना पुष्कली भवति।

यदा प्रभृति विलासः शम्पाहस्ते कार्यनिर्वाहिकात्वेन दायित्वं समर्पयति तदारभ्य सा आत्मानं तथा वर्णयितुं प्रतिवेशिद्वारं गच्छति। अद्य यदि एकस्य तर्हि अपरदिने अपरस्य गृहं गच्छति। महिलामङ्गल-समितिविषये प्रचोदयति। सा विवृणोति—महिला अद्यत्वे निर्यातिताः। पाकशालां विहाय अन्यत्र तासां स्थानं नास्ति। बहिर्गमने विपत्। गृहे च निर्यातना। कर्मक्षेत्रं शातनम्। सर्वत्र भयम्। सर्वदा च शोषणाय जना भ्रष्टवृत्तिकाः। एषा महती समस्या। प्रतिक्षेत्रं नारीणां स्थानं सुरक्षितमपि अरक्षितमिव। एतस्य कारणं स्पष्टम्। नार्यो हि न जागरूकाः। शिक्षिता अपि न चिन्ताशीलाः। सर्वासां ज्ञातसारे घटना तु अरुचिकरी भवति। किन्तु न काऽपि प्रतिवदति। नार्यः पण्या भवन्ति। परं न काऽपि स्वरम् उत्थापयति। सम्मुखे एव ता दासीभवन्ति। तथापि न काऽपि अभियुङ्क्ते। एतस्य कारण नारीणामसाहित्यम् ·· संकीर्णस्वार्थपरता··· ईर्ष्यापरायणता····।

इदानीं समय उपगतः। विषयेऽस्मिन् चिन्ता कर्त्तव्या····।
शम्पा एवं प्रवर्त्तते।

निशान्तश्च निजमार्गे पूर्ववत्।

यदा शम्पा जनसेवार्थं गृहान्निर्गच्छति तदैव जनानाम् अशुभ-कामनया निशान्तः कार्यालयं गच्छति। पथि जना मिलन्ति। तं नमस्कुर्वन्ति। असौविध्यं ज्ञापयन्ति। निशान्तस्तु उपेक्षया अपरेण सह जल्पति। तस्य यदि किमपि कर्मविषये श्रृणोति तर्हि तमुपेक्ष्य

अन्येन सह जल्पति । एवमालापद्वारा स बहुकर्मव्यापृत इव अभिनयति । आत्मप्रौढिं प्रदर्शयन् अनुज्ञावचनं व्याहरति । उच्चपदाधिकारीव इतस्ततो निर्दिशति । मुखे तस्य अपेक्षामुद्रा । भङ्गीमध्ये पदाधिकारिणो मर्यादा । आश्वसनायां सतर्ककथा । अभिलाषे उत्कोचप्रथा ।

विलासनिकटे समयाभावः ।

जननयने स न केवलो वणिक् । अपितु नाना हितैषिसंस्थानां सदस्यः । कतिपयलघुशिल्पानां संस्थापकः । कतियुवकल्याण समितीनां संयोजकः । पुनश्च कतिपय स्वायत्त शिक्षानुष्ठानानां सौजन्य—सम्पादकः । किन्तु निजायत्तपरम्परायां स्वयमेकं विभक्तव्यक्तित्वम् ।

अट्टशूलतः अट्टशूलान्तरम् एकविपणीतः अपरविपणीमिति संचरणे विलासो दूरचरः—। सम्पर्कपरिसरे जना अनेके । स्नेहे मधुशाला विनोदझरी । निर्बन्धे केवलं धनम् । निजस्वमिति देहस्य परिधानम् । गृहं तु अनैकिकी शय्या । जीवने सत्यमनेकान्तम् ।

गृहपरित्यागात् परं न तथा प्रभावः गृहस्य तदुपरि । गृहे के सन्ति ? कथं सन्ति ? किं वा कुर्वन्ति ? सर्वमेतच्चिन्तयितुं तस्य अवसरो नास्ति । यदा गृहकथा मानसम् आयाति तदा स क्रुध्यति । तथापि भगिनी रजनी तस्य भावनापथमारुणद्धि । गृहपरित्यागसमये सा कियती कातरा नासीत् ?

विलासस्य मनसि एवमासीत् यत् स पुनः रजनीं कस्मै अपि प्रदास्यति । अद्यत्वे विधवायाः किं तात्पर्यम् ? जनो जन्म लभते । म्रियते अपि । संसारार्थं सम्पर्कः । आनन्दाय च उपभोगः । यदि कश्चित् आकस्मिकतया म्रियते तर्हि तस्य भोगसमाप्तिः । तस्यैव सम्पर्कं स्मृतिरूपेण प्रपूज्य को वा किमर्थं दुःखमनुभवेत् ? कथं वा तदर्थम् आत्मानं समर्पयेत् ? जनस्तु मृतः । संस्क्रियानन्तरं किं वा अवशिष्यते ? किन्तु—, एतन्निमित्तं स्त्रीजनो नितरां पीड्यते । पुरुषस्तु यत्र कुत्रापि नवीनसम्पर्कं स्थापयति । स वा पत्नीकृते किम् उत्सृजति ? किं च स्मृतिरूपेण संचिनोति ? यदि पुरुष एवमाचरति तर्हि नारी किमर्थं सीदेत् ?

किन्तु रजन्याः पुनर्विवाहविषये पितुः सम्मतिर्नासीत् । स विलासस्य प्रस्तावं प्रत्याख्यातवान् । तस्य चक्षुषा समाजः संकीर्णः ।

तथाकथित—समाजपण्डिता भ्रष्टाः। जनश्च स्वार्थी। अद्यत्वे यदि कश्चित् किमपि अननुमतं स्वीकरोति तद् धनलोभेन एव। न कश्चित् जीवनस्य गुरुत्वमनुभवति।

एषु विषयेषु चिन्तयित्वा कालक्षेपं न सहते विलासः। विचारोऽयं नाधुना तदुपरि। रजनी जानाति, सा किमुपास्ते, पिता च जानाति, रजनीभाग्ये किमस्ति। कस्यचिद् वस्तुनः संज्ञान्वेषणं विशदविवरणं वा विलासनिकटे वृथा। अद्यतनप्रवाहे यद् आयाति तत् सर्वस्वम्। तस्य व्यसने घटनार्थं काचित् प्रतिक्रिया नाम मूढ़ता। तस्य विचारे स्वयं स सम्राट्। अन्यत् सर्वं प्रकीर्णम्··· असंहतम्··· असंगतम्··· अस्तव्यस्तम्। समूहलक्ष्ये न तस्य विश्वासः। अपितु यत् स विश्वसिति तदेव तस्य लक्ष्यम्।

शम्पा विलासमनुसरति।

विलासस्य वचने शम्पा एव सरस्वती। साऽपि विलासस्य प्रशंसायां निजवीणां नदति। तम् अन्वेषयति। साक्षात्कारे च आत्मानं प्रीणाति। एकान्ते उपविश्य रहस्यं मन्त्रयति। बन्धुतावर्धनाय सा एवं प्रवर्त्तते येन आत्मीयतमा भवेत्।

विलासमन्वेषयन्ती एकदा सा विलासस्य ग्रामे उपस्थिता। ग्राम्यपरिवेशे सा अभिनवा नागरी। ग्रामपथे तदुपरि अनेकदृष्टिः। ललनानां कटाक्षे तस्या वेशशैली चर्चाविचनस्य उद्दीपिका। अल्पशिक्षितानां कर्णेजपेषु सा सभ्या। शिक्षितानामुपेक्षावचने सा नागरी। रक्षणशीलानां नेत्रकुञ्चने सा दुष्कुलीना। दिनजीविनां साधारणचिन्तायां सा परकीया परदेशिनी।

कुलमणिः शङ्कितः।

शम्पा अपृच्छत्।

— इदं विलासबाबोः गृहम्?

— कमन्वेषयति भवती?

— अत्र विलासबाबुः···

— स तु नास्ति। किं कर्म तन्निकटे?

— कार्यमासीत्। किन्तु···

— उपविशतु भवती।

— कुलमणिः मुखं विवर्त्य सम्बोधितवान्।

— रजनि····! रजनि····!!

मुर्मुः उपस्थितः।

कुलमणिः आदिशत्।

— अरे ···मुर्मो ···! जलं देहि। देवी पादं प्रक्षालयतु।

शम्पा उपेक्षया न्यवारयत्।

— न ···न ···। मास्तु ····। मम समयो नास्ति। अहं सद्यः प्रत्यागमिष्यामि।

समयेऽस्मिन् रजनी समागता। असरसमुखे तस्याः शान्तिरतिः। वसने सात्त्विकद्युतिः। वचने व्यसनं निरुपाख्यम्। किन्तु दृष्टचग्रे स्पर्धिनी आसक्तेः काचित् लिप्तरेखा। विनीतभावेन सा उक्तवती।

— आगच्छतु भगिनी। अन्तरागच्छतु ····।

अन्तः प्रविश्य शम्पा दाम्भिकतया अवदत्।

— मम तु बहुकर्माणि। अवसरो नास्ति।

— मनाग् उपविशतु।

शम्पा आसने उपविश्य अपृच्छत्।

— विलासबाबुः महिलामङ्गलसमितिविषये किमपि उक्तवान् वा ?

— महिलासमितिः····? विलासबाबुः···? स तु अनेकदिनतः गृहमिदं परित्यक्तवान्।

— न कदाचित् आगच्छति ?

— तस्य किमत्र वा कर्म ?

— तर्हि, भवती ·····?

— अहं तस्य भगिनी।

— भवत्या अपि समितौ नान्तर्भावः ?

— न जाने, काऽसौ समितिः ?

— भवादृशीनाम् अनाथानां कृते इयं समितिः।

रजनी चमत्कृता। शम्पा तु प्रगल्भवादिनी।

— अहमस्याः समितेः सम्पादिका। विलासबाबुः संस्थापकः। अत्र विधवानां पुनर्विवाहः, अनूढानां विवाहव्यवस्था, दीनरमणीनां पुनः

संस्थापनमिति केचन प्रकल्पाः स्वीकृताः। भवती अपि अत्र योगदानं करोतु।

— किमहं तत्र करिष्ये ?

— यथाभिरुचि कर्म।

— अत्राऽपि तथा करोमि। किं पार्थक्यम्····?

— गृहेऽस्मिन् स्वातन्त्र्यं कुतः ?

— किं तर्हि भवती गृहं परित्यक्तवती ?

वचनेऽस्मिन् शम्पा किंचित् शङ्किता; किन्तु आभिजात्यव्याजेन वसनाञ्चलं प्रसार्य सहसा उपनेत्रं नयने निहितवती। द्वारम् आगम्य सा अवदत्।

— मद्विषये चिन्तामाऽस्तु। यः संस्थायाः संस्थापकः परिचालको वा तस्य महल्लक्ष्यमस्ति। तेन तस्य व्यक्तिगतजीवनं प्रभावितं भवति। साधारणजनेन सह तस्य तुलना अनावश्यकी। मा अन्यथा चिन्तयतु। प्रथमतः समितेः सदस्या भवतु। अनन्तरं सर्वं ज्ञास्यति। भवतु—, अन्यत् अन्यदा। नमस्ते—।

शम्पा त्वरया प्रस्थिता। गतिताले तस्या अभिमानं स्फुटम्। उपनेत्रमार्गे आधुनिकता सुन्दरी। करचालने आत्मदर्शनलिप्सा वासस्विनी। अञ्चलरंगे तरङ्गः प्रासङ्गिकः। उद्धताङ्गे रङ्गः तथापि निःसङ्गः।

अपरपार्श्वतो निगर्म्य कुलमणिः अपृच्छत्।

— रजनि····! केयं महिला—?

— एषा भ्रातरमन्विष्यति।

— किं कर्म—?

— स्पष्टं न वदति।

विमुखतया कुलमणिः अस्फुटमाह।

— जाने, तस्य इयमेव गतिः भवेत्। अन्ततो अतिशयमनुतपेत्। तदा न कोऽपि आत्मीयः स्यात् किमपि श्रोतुम्। गच्छतु—। कुपथस्तु तस्य जीवनम्। नष्टस्य को वा अन्यः पन्था भवेत् ?

कुलमणिः कर्मणि व्यापृतः। मुर्मुः रजनीम् अपृच्छत्।

— भगिनि····! किमद्य कर्म····?

— अरे ··! तैलं नास्ति । इन्धनं नास्ति । गृहे बहिश्च प्रक्षालनाय जलं नास्ति ।

— अनुपदं गच्छामि । हँ···, शाकक्षेत्रे जलं न पतितम् । ग्रीष्मकालः····। वृष्टिस्तु न भवति । वीजानि दिनत्रयतः उप्तानि । तथापि अंकुरो न दृश्यते । तदर्थं जलमपि आवश्यकम् ।

— भवतु····। तत् शीघ्रं समापय । तैलादिकम् आनय । नोचेत् रात्रौ दीपोऽपि न ज्वलेत् ।

मुर्मुः यथापूर्वं व्यापृतः ।

दिनभागो नम्रः । अवसानविरागी तपनः । पादपशिखरे ग्रीष्मलीला आश्वस्तिशरणा ।

रजनी सांध्यस्नानं समापितवती । इदानीं सरलवेशः । साधु-परिपाटी । अङ्गरागो निसर्गः । कर्मप्ररोहे निश्चपलः संसर्गः । पूजा-प्रारूपे आवेग एव अपवर्गः ।

घण्टानादेन सह रजनी दीपं सज्जीकृतवती । शिथिलपूजन प्रकारे नेतिवादः विपरिणतः । अनुरणन निवहे सा तल्लीना अभूत् । निमीलने आकृतिमान् अभूत् वैष्णवः कश्चित् राजकुमारः । निर्झर पुलिने स अश्वाद् अवातरत् । तत्रैव स मणिमाणिक्यादीन् प्लावयितु-मारब्धः । तदा रजनी निर्झरधारे अवगाहते स्म । मण्यादयः तस्याः पार्श्वे कुण्डलीं विधाय समतरन् । रजनी तदानीं नितरां पुलकिता । साश्चर्यं च इतस्ततः अपश्यत् । सहसा राजकुमार उपगतः आर्द्रवसना रजनी अकम्पत । किन्तु राजकुमारः निर्निमेषं तामपश्यत् । ततः तामालिंग्य अचुम्बत् । ततश्च अश्वोपरि उपविश्य तामङ्कोपरि निधाय अधावत् ।

रजनी अतिशयं भीता ।

झटिति च अपश्यत् - दीपशिखा वर्त्तिमूलं ग्रसितवती । इष्टप्रकोष्ठे तमसा राजेश्वरी । सांध्यकुसुमेषु देवो राजसः । धूपधूमे द्वारदेशः अन्धः । अलिन्दकोणे नक्षत्रज्योतिः संध्याशेषं सूचयति । विहगविरुतिः रात्रिरसिका ।

रजनी दीपमदीपयत् ।

प्रकाशे निलयो दीप्तः । रजनी नेत्रं व्यघूर्णयत् । पुनः प्रकाशः ? किं निमत्तम् ? केवलं गृहार्थम् ? गृहम् ···· संसारस्य प्रथम कल्पनम् ··· शरीरस्य नामान्तरम् ··लयस्य निश्वसनम् ···विलयस्य आश्वासनम् ··· अंकुरस्य रहस्यवृत्तिः····पादपीभवनस्य मनोभूमिः···महावृक्षस्य हृदय-तलम् ···छायाया अन्तरालम् ···प्रणवस्य अलक्ष्यकल्लोलम् ।

अन्वेषणे इदमेव प्रथमस्थलम् ··उपभोगे आनन्दकुसुमस्य प्रथम दलम् ··संचये दृश्यफलम् ···निश्चये आत्मबलम् ···संशये इदमेव छलम् । ···कर्मनिमित्तम् आलयः····श्रमनिमित्तम् आश्रयः····अपकर्मार्थं नरकः···सुकर्मणि स्वर्गः·····—।

किन्तु निशान्तकृते गृहमिदम् असौविध्यस्य मण्डलम् । अत्र सः असौविध्यं सृजति । असौविध्ये पातनोपायं चिन्तयति । जना आगच्छन्ति । विघ्नजाले निपतन्ति । धनानि निष्कारणं हारयन्ति । वृथा विलपन्ति । गृहं प्रत्यागच्छन्ति । प्रतिश्रुतिः पापाय कल्पते । अतः ते अभिशप्ता इति चिन्तयन्ति । निशान्तमपि अभिशपन्ति । निशान्तस्य हासे तु नगरस्य विभिन्नस्थानेषु प्रासादा धवला दृश्यन्ते ।

संचितेषु यथेच्छं स्वीकृत्य व्ययीकृत्य च शम्पा आधुनिका भवति । नववसनेषु सा अभिनवायते । अलंकाराणां नवीनाकृतिषु शरीरं विभूषयति । महाजनानां समक्षे समाजसेविका भवति । विला-सस्य व्यसनेषु सा प्रेयसी, मद्यकूपीषु च स्रोतस्विनी संजायते ।

तद्दिने निशान्तः क्लान्तः ।

रात्रौ द्वादशवादने शम्पा गृहं प्रत्यागता । यथापूर्वं वसनं परि-वर्त्य शयितुमुपक्रान्ता । निशान्तः शय्यामधिरूढः । परं नेत्रे निद्रा नायाति । स कुप्यन् अवदत् ।

— कुत्र गता एतावत्कालपर्यन्तम् ?

— सम्मेलनमासीत् ।

— किं प्रतिदिनं सम्मेलनं भवति ?

— किं त्वमद्य न गतवान् ?

— मम तु सदा सम्मेलनं न भवति । कार्यालये कदाचित् कार्याधिकं भवति । अतः विलम्बो भवति । तव तु न कार्यालयः, न वा किमपि कार्यमस्ति ।

— किं मम बान्धवा न सन्ति ? सख्यो न सन्ति ?

— ममाऽपि सन्ति । किन्तु नाऽहं प्रतिदिनं तेषां गृहं गच्छामि ।

— तेषां निकटे तव किमपि कर्म नास्ति ।

— किं ते कर्म प्रतिनक्तम् ?

— मम कर्मविषये कथमद्य ते चिन्ता ?

— तव गतिरीतिषु इदानीं मे सन्देहः ।

— निशान्तः —! वचनं संयम्य वार्तालापं कुरु ।

— कथम् —?

— विवाहतो वर्षद्वयं गतम् । कस्मिन्नपि दिने तव अभियोगो नासीत् । अद्य किमर्थम् ?

— त्वं सुन्दरी इति किं यथेच्छं करिष्यसि ?

— विवाहतः प्राक् तथा मे आग्रह आसीत् । तदहम् उक्तवती । तदङ्गीकृत्य त्वं मां परिणीतवान् । अद्य पुनः कथं विवादः ?

— जाने —,सर्वान्नपि आत्मीयान् तिरस्कृत्य त्वामहं परिणीतवान् । नायं तस्य अर्थो यत् यथा त्वं वदिष्यसि तथाऽहं प्रवर्त्तिष्ये ।

— यदि एवं चिन्तयसि तर्हि निजव्यवस्थां कथं न सम्पादयसि ?

— किमस्यार्थः ?

— अर्थस्तु स्फुट एव ।

— तर्हि, किमपि वक्तुं मे अधिकारो नास्ति ?

— नास्ति —। मदर्थमेव हि त्वं सर्वेषां प्रीतिभाक् ।

— तथापि त्वं मे पत्नी ।

— पत्नी न सेविका, न परिचारिका, न वा धात्री । गृहेऽस्मिन् यथा ते अधिकारः तथा ममापि । कर्मणि अन्यत्र च यथा ते स्थानं तथैव ममाऽपि ।

— किन्तु —मम इच्छाविरुद्धं त्वम् आचरसि ।

— त्वमपि तथा करोषि ।

— तर्हि किं,—अहं ते दासानुदासो भवेयम्—?

— तथा त्वमेव इच्छसि मत्कृते ।

— गृहरक्षार्थं परिचालनार्थं च त्वामहम् उपदिशामि । अन्यथा गृहरक्षा कथं स्यात् ?

— तवापि कर्त्तव्यपरिसरे गृहदायित्वम् अन्तर्भवति ।

— इतः परं यदि इतस्ततो विहरिष्यसि तर्हि गृहं विक्रेष्यामि ।

— किमर्थम्···? मदर्थं गृहम् । अहमत्र अधिकारिणी ।

— अहो···अनेनैव दर्पेण त्वं बहिः विहरसि ? मम गृहे अधिकारिणी भूत्वा अपरमपि अधिकारिणं कारयितुं यतसे—।

— निशान्त···! सकृदहम् उक्तवती वाचं संयमय इति ।

— मर्मकथने आघातो भवति ?

— किं मे मर्म···?

— विलासेन सह कस्ते सम्पर्कः ?

— स मे बन्धुः ।

— कदारभ्य स तव बन्धुः ?

— सुप्यताम्—। वृथालापो माऽस्तु । नास्ति मे समयः । निष्फलं मा जल्प ।

— विलासनिकटे सम्प्रति आलापः सफलो भवति । अत्र कथं न निष्फलः स्यात् ?

— कथं सदा 'विलासः'···'विलासः' - वदसि । किमिच्छसि···?

— श्वः प्रभृति रात्रौ बहिर्गमनस्य ते विरामः ।

— किमर्थम्···?

— अयं मे आदेशः ।

— कस्ते आदेशं पालयति ? ये निम्नस्थाः, ये च अधस्तनाः ये वा तव कुकर्मनिमित्तम् असौविध्ये निपतन्ति ते एव तव आदेशं पालयिष्यन्ति, नाऽहम्···।

— शम्पा—?

— विरम—। गर्जने किमस्ति ?

— त्वम् उद्धता—स्वैरिणी—वेश्या—।

— त्वमपि किंकरः, पशुः, उच्छिष्टभक्षी···मद्यपः ।

— मम दासी भवितुं तव योग्यता नास्ति ।

— मम दासो भवितुं त्वमपि अयोग्यः ।

याहि, गृहमिदं परित्यज····। नात्र ते स्थानम् ।

— तवेदं गृहम् ? कुतो धनमानीतवती ? पितुः गृहात् —? हीनपरिवारस्य कन्या····जारजसंततिः····कुलटादुहिता —। अत्र सर्वमपि आत्मसात् कर्त्तुमिच्छसि, नहि —? द्रक्ष्यसि····सद्यस्ते मस्तकं विच्छिद्य विलासनिकटे पातयिष्यामि । ततो विलासस्य मस्तकम्····

— विरम····। माऽधिकं वीरत्वं दर्शय । अद्य किंचित् अधिकं मद्यं पीतम् । याहि - सुप्यताम्····।

शम्पा निजप्रकोष्ठं गतवती । त्वरया च कपाटं पिहितवती । दीर्घश्वासं गृहीत्वा मुक्तभावेन शय्यायामालुलिता । नेत्रकोणे अश्रुधारद्वयं विगलितम् । सा नेत्रं न्यमीलत् । विद्युतप्रदीपस्य नीलप्रकाशे मुखं तस्या अधिकं मलिनमासीत् ।

अपरप्रकोष्ठे पर्याकुलभावेन निशान्तः सुप्तः ।

काचवातायने सूर्यो बिम्बितः ।

प्रतिकूलपवने शम्पा गृहान्निर्गता । निशान्तस्तु मूकः । प्रतिरोद्धं, साहसः तस्य भग्नः । विरक्तमनोरथे वितृष्णभावः । त्यागपरिवर्त्तनयोः द्विधाभावे स विक्लवः । नयनमार्गे स एव सचिवालयः····निजनिर्मितप्रासादाः —असौविध्यसृष्टिनिमित्तं कति पुस्तिकाः—। प्रतिकार्यं च अनिष्टान्वेषणे केचन उपायाः । पुनरपि मोहः निजार्जितसंपत्कृते— निजनिर्मितगृहाणां कृते —सचिवालयस्य वृत्तिकृते— मधुसम्मेलनकृते । सः अचिन्तयत्—कुत्रेयं गमिष्यति? मधुबाला मधुशालामेव गमिष्यति । मधुकरनिकटे कुसुमलक्ष्मीरूपेण सौन्दर्यसम्भारं प्रसारयिष्यति । ततः मधु—मधूनि —। तदनु मदः····मोदः····प्रमोदः—। ततः चुम्बनालिंगनपरिबन्धे पुनः पुनः नर्त्तनाय सा आत्मानं सज्जीकरिष्यति । ततः—? ततः····?

निशान्तमनसि तु खेदो नासीत् । नात्र वैचित्र्यम् । इयं जीवनस्य काचित् धारा । सम्पद्घूर्णिषु एवं जना भ्रमन्ति । कियन्तो वा विचारयन्ति—घूर्णिः कथं भवति ? किमर्थमत्र कश्चित् पर्णायते ? कोऽयं वा अवशेषः ? अवशेषस्तु अभावस्यत् स्वादविशेषः ।

अभिमानस्य अन्तराले जनस्तु धनसर्वस्वः। कर्त्तव्यच्युतिः तदीयस्वार्थधारायां विशेषभूमिः। परं स ज्ञातुं न प्रभवति—विच्युति-विलये अस्थिरः परमाणुरिव स एव प्रध्वंसनुसंधत्ते।

विलासनिकटे परिचरा अनेके।

अचिरमेव नगरपालिकानिर्वाचनं भविता। तत्र विलासः प्रार्थी भवतु इति पार्श्वचराणामाशयः नगरेऽस्मिन् न तादृशो नेता अस्ति। ये पुरातनाः सन्ति ते सम्प्रति स्वातन्त्र्यसंग्रामनाम्ना जीवन्ति। इतिहासं श्रावयन्ति। कारावरणं च उदाहरन्ति। क्रान्तेः स्मृतिमुपस्थाप्य नेतृत्वं न्यस्यन्ति। तेषां मतेन ते प्रौढ़ाः। अतः अधिकः तेषामनुभवः।

किन्तु विलासो युवकः। पार्श्वचराणां वचने स इदानीम् उदीयमानः। तस्य परिवारो नास्ति। जनसेवानिमित्तं स गृहं परित्यक्तवान्। तन्निकटे नाद्य वृद्धपिता न वा विधवा भगिनी। किन्तु सहस्रशो दरिद्रपरिवाराः। सहस्रशो वृद्धपितरः। लक्षशो विधवाभगिन्यः। अद्यत्वे सर्वकारीयकार्यालये कर्म न भवति। सर्वे च अधिकारिणः स्वल्पवेतननाम्ना अधिकं धनं संग्रहीतुं यतन्ते। दरिद्रा म्रियन्ते। धनिनो लाभांशमाहर्त्तुं कार्यालयं श्वशुरालयं मन्यन्ते। चिकित्सालये चिकित्सा न भवति। विद्यालये न छात्रः पठति न वा शिक्षकः पाठयति। देशेऽस्मिन् शिक्षाक्षेत्रे अधिकजना नियुक्ताः। परं सर्वतोऽवनतिः अस्मिन्नेव क्षेत्रे। चिकित्सका बहवः। परं सामान्यरोगोऽपि नोपशाम्यति। यन्त्रिणो बहुविधाः। किन्तु एकस्यापि मार्गस्य सुचारुतया निर्माणं न सिद्ध्यति। एवं नाना समस्याः। युवकानां हस्ते यदि शासनं न तिष्ठेत् तर्हि कुत्रापि उन्नतिः न भवेत्।

ततः सर्वसम्मत्या विलासः नगरपालिकानिर्वाचनकृते प्रार्थित्वमङ्गीकृतवान्। जनानां कृते निर्वाचनप्रतिश्रुतिः निश्चिता। एतन्मध्ये दैन्यदूरीकरणम्, उद्योगसंस्थानां प्रतिष्ठापनम्, नगरतल-वासिनां कृते गृहनिर्माणम्, अनाथविकलाङ्गजनानां कृते वृत्तिः, कर्मक्षेत्रे महिलानामग्राधिकारः, शिशुविकाश योजनायाः प्रवर्त्तनम्, शिक्षितानामात्मनियुक्ति प्रकल्पस्य नवीकरणम्, नगरस्य सौन्दर्य-वर्धनम्, नगरे मन्दिराणां प्राचीनकीर्त्तीनां संरक्षणम्, पर्यटकानां निवासार्थं अत्याधुनिकरीत्या अट्टशूलानां निर्माणम्, प्रदूषणस्य निरोध-नम्, परिवेशस्य सुरक्षा च प्रामुख्येन प्रतिश्रुतयो घोषिताः।

विलासः चिन्तयति ।

निर्वाचनप्रचारनिमित्तं केचन विश्वस्तप्रचारकाः अपेक्ष्यन्ते । प्रतिगृहं उपगन्तुं कतिचन नार्यः अपेक्ष्यन्ते । एतदर्थं निर्दिष्टधनराशेरपि अपेक्षा अस्ति । प्रतिश्रुतिमुखेन केषां चन धनिकबन्धूनां सहायता च आवश्यकी । यत्र प्रार्थित्वं तत्र अर्थः । यत्र अर्थः तत्र रङ्गः । यत्र रङ्गः तत्र अङ्गनाः । यत्र अङ्गना तत्र दुर्गभङ्गः । विलासः शम्पा-देवीं स्मृतवान् । पुनश्च प्रतिपक्षेण सह चतुररीत्या अभियाननिमित्तं स पार्श्वचरान् निरदिशत् । प्रतिस्तरं धनानि यथायोग्यं व्यतरत् ।

तद्दिने शम्पा व्यस्तभावेन विलासनिकटे उपस्थिता । मुख-मण्डलं घर्माक्तम् । कुन्तलं माल्यविहीनम् । पर्याकुलवसनभागे सौंदर्यं विलुलितमिव । नेत्रान्ते जलकणः अणीयान् । तस्या व्यग्रभावमालक्ष्य विलासः किंचिदवनतस्वरेण अवदत् ।

— अरे···! शम्पादेवी ? आगच्छतु ···आगच्छतु ।

शम्पा प्रविश्य उपाविरात् ।

विलासः जिज्ञासां प्रकटितवान् ।

— कथयतु ··।

— बहु वक्तव्यमस्ति । अधुना अहं क्लान्ता ।

— तर्हि, अतिथिप्रकोष्ठे किंचित् विश्राम्यतु ।

एकः परिचरो मार्गं निरदिशत् । शम्पा दीर्घश्वासं गृहीत्वा अतिथिप्रकोष्ठस्य द्वारं पिहितवती ।

विलासः पार्श्वचरैः सह विमर्शं समापितवान् । क्लान्तः सन् अन्तरालमागतः । गृहस्य चतुर्पार्श्वे नेत्रं विघूर्णयन् किंचित् हृष्टः संजातः । ततः परिचारकमाहूय आदिशत् ।

— द्वयस्य कृते भोजनमायोजय ।

क्लान्तभावेन विलासः चित्रपटमेकं पश्यति । अयं महात्मा ···लब्धप्रतिष्ठो जनः । जीवनेऽयं बहु त्यक्तवान् । बहुत्र कार्यं कृतवान् । जनानां प्रगतये चिन्तितवान् । उन्नतिमूलककर्मणां नेतृत्वं प्रदत्तवान् । उत्सर्गनिमित्तं नाना संस्थाभिः सः सम्मानितः । परमद्य समयो भिन्नः । पुष्पमाल्यनिमित्तं पार्श्वचरा निर्मातव्या भवन्ति । कृतीना-मुद्घोषणार्थं विज्ञापनस्य आवश्यकता भवति । सम्मानप्राप्तये

कियन्तो जनाः तत्तत्स्थलेषु स्थापनीया भवन्ति । न धर्माचरणम्···· न वा कर्मानुसरणम् । केवलं वाणिज्यम् । अर्थप्राप्तये संधिस्थापनम् । लाभाय च मैत्रीकरणम् ।

परिचारको न्यवेदयत् ।

— भोजनं सन्नद्धम् । आगमनं भवतु ।

विलासः शम्पामाकारयितुं निर्दिश्य भोजनस्थलीमुपगतः ।

आपूर्णा भोजनचत्वरिका । वातायनानि सूक्ष्मवसनेषु आच्छन्नानि अपि मुक्तानि इव । विद्युद्व्यजनेन सह बहिस्थपवनः तत्र तालं सम्मेलयति । परिचारकः पश्चात् तिरस्करिणीं प्रसार्य अन्तर्गतः । विलासः शम्पाम् अपृच्छत् ।

— कथमद्य असमये ?

— अहं भवतः प्रतिश्रुतिमिच्छामि ।

— का प्रतिश्रुतिः ?

— महिला समितिविषये भवान् न किमपि करोति । नाम्ना एव अहं कार्यनिर्वाहिका । कार्यं कुत्र ?

— एतदर्थं व्यग्रा····?

— नहि—।

— तर्हि, किमन्यत् ?

शम्पा दीर्घश्वासमग्रहीत् ।

— अहं निशान्तं परित्यज्य आगता ।

— किमर्थम्—?

— तेन सह कलहोऽद्य तीव्रतरः ।

— कथम् ?

— तद्रात्रौ सम्मेलनं समाप्य विलम्बेन गृहमागता । तदानीं निशान्तः गृहे आसीत् । यदाऽहं गृहं प्रविष्टा तदा स कुपितसर्प इव मामाक्रान्तुमुद्यतः । तमहं प्रतिरुद्धवती ।

— नेयं नवीना घटना भवदीयजीवने ।

— किन्तु —ह्यः रात्रौ·····

— मन्ये, अधिकाधिकतया कलहः संजातः ।

— हाँ·····।

— तर्हि, समाधातुं गमिष्यामि ?

— नहि ···। पुनस्तत्र गन्तुं न मे मनः। अहं त्यागपत्रं दास्यामि।

विलासः अहसत्।

— किमेतद् वदति ?

— भवान् चिन्तयति, केन प्रकारेण जीवनं नेष्यामीति नु ?

— नहि ···। तत्तु सुकरम्। किन्तु ·····

— भवान् मां सहायितुं नेच्छति ?

— कथं न ?

— तर्हि, महिलासमितिं किमर्थं न स्थापयति ?

— अवश्यं स्थापयिष्यते। अग्रे निर्वाचनम्। तदर्थं महिलासमितिरपि ममैका प्रतिश्रुतिः।

— इदानीं तर्हि कस्य कार्यनिर्वाहिका अहम् ?

— मम ·····।

विलासः अहसत्। शम्पानयने हर्षं मुकुलितम्। विलासः भोजने प्रवृत्तः। शम्पामपि अनुरुद्धवान्।

— भवतु···। प्रारभ्यताम्।

उभौ भोजने प्रवृत्तौ।

एकान्ते उपविष्टः विलासः।

निर्वाचनप्रचारस्य सकलयोजना सद्यः समाप्ता। विशिष्टस्थानेषु निर्वाचनशिविरार्थं जनेभ्यो दायित्वं वितीर्णम्। प्रतिगृहमुपगन्तुं प्रतिपरिवारं च अनुकूलयितुं शम्पा भारमग्रहीत्। विलासः स्वयं अर्थविनियोजने स्थानपरिदर्शने विशेषोद्बोधने च अधिकृतः।

इदानीं विश्रामसमयः। वातायने विलासः आकाशं पश्यति। सम्मुखे श्वेतजलदस्य विविक्तांशः। चिन्तायां नारीत्रयम्। पश्चात् उपेक्षिता रजनी। मध्ये अदृशूलस्य आतिथेयी रोजा। पुनश्च अग्रे शम्पा। तथापि न तृप्तिः। अन्तराले सम्प्रति कथैका मानसं विकलयति।

स्मृतौ वर्षा वर्षीयसी ।

वर्षा ग्रामस्य नेत्रपेया बालिका । प्रथमयौवने सा चिन्मयस्य नेत्रान्ते मिलिता । उभयस्य कृते ग्रामसीमा स्नेहवत्सला अभूत् । तत्रत्य आम्रवनं, तड़ागः, तटिनी, गुल्मानि च उभयस्य रहस्यविहारे चुम्बनानि शाद्वलानि कुर्वन्ति स्म । चिन्मयः ग्रामप्रधानस्य पुत्रः । तस्य आभिजात्यनिकटे वर्षा विवाह्ययोग्या नासीत् । वर्षा हि दरिद्रकन्या ।

एकदा चिन्मयः कार्यार्थं मातुलगृहं गतवान् आसीत् । तत्र सः अनेकदिनपर्यन्तं स्थितः । तथापि पत्रमाध्यमेन तस्य स्नेहसम्पर्कः सजीव आसीत् । किन्तु वर्षायाः पिता निरुपायः । स हि कस्यचित् अपरग्रामप्रधानस्य भृत्य आसीत् । ग्रामान्तरे तस्य जीविका वर्षायाः प्रीतिसम्पर्के सहायिका आसीत् । अतः वर्षा मनोऽनुकूलं वरं निश्चेतुं प्रवृत्ता । तस्याश्च कल्पनास्तरे चिन्मय आगतः ।

वर्षायाः पिता तु कन्यायाः प्रीतिदृढतायां भीतः ।

समयेऽस्मिन् स ऋणग्रस्त आसीत् । निजमस्तकविनिमयेनाऽपि स ऋणपरिशोधं करिष्यतीति प्रभुनिकटे तस्य प्रतिज्ञा । प्रभुः तस्य कन्यायाः तारुण्यं ज्ञात्वा तामानेतुमादिष्टवान् । वर्षायाः पिता अनभिलष्यापि कन्यामानीय प्रभुनिकटे उपस्थितः । प्रभुः कन्यां स्वीकृत्य तं ऋणतः विमोचितवान् । तदनु वर्षा ग्रामप्रधानस्य उपपत्नीरूपेण जीवनम् अनयत् ।

चिन्मयः मातुलगृहात् प्रत्यागतः । वर्षाविषयं ज्ञात्वा अतिशयेन स खिन्नः । परं किमपि कर्त्तुं तस्य शक्तिर्नासीत् । तथापि वर्षाया दर्शननिमित्तं स बहुयत्नं कृतवान् । तस्या दर्शनं तु कष्टकरमभवत् । एकदा स सर्वेषामलक्ष्ये योगिवेशं धृत्वा इतस्ततः अभ्रमत् । अन्ततः स वर्षाया ग्रामं प्राप्तवान् । तत्राऽपि वर्षा चिन्मयस्य दर्शनार्थम् उत्कण्ठिता आसीत् । यदा योगी चिन्मयः तस्या द्वारे भिक्षामयाचत तदा वर्षा तस्य स्वरतः तं पर्यचिन्वत् । भिक्षां दातुं पात्रं धृत्वा सा द्वारम् आगता । तदा उभयस्य नयने अश्रु परस्परप्रणयम् अभिव्यज्य कपोलतः न्यगलत् । तद्दिने योगी चिन्मयो निष्क्रान्तः ।

वृद्धपते उपपत्नीरूपेण जीवितुं वर्षाया इच्छा नासीत् । यद्यपि बाह्यभूषया वधूगौरवे सा सुखिनी इति प्रतीयते स्म तथापि अन्तःकरणे तस्याः प्रीतिशिखा दाहसर्वस्वा आसीत् । पुनश्च कति-

वयस्कपुत्राणां सम्बोधने सा माता आसीदिति प्रथेयं तस्या अनुभवे दारुण आसीत् ।

अपरदिने ग्रामे कोलाहलः श्रुतः । ग्राममध्यस्थवटवृक्षमूले हि कश्चित् योगी मृतः । मरणसमये तन्निकटे कति जना उपविष्टा आसन् । प्रतिवचनं मुखे तस्या 'वर्षा' इति शब्दो झंकृत आसीत् । ग्रामे योगिनः शेषसंस्कारनिमित्तं प्रतिगृहं धनादानस्य व्यवस्था स्वीकृता । अन्ततः तस्या चिता सज्जीकृता । समयेऽस्मिन् वर्षा वार्त्तामिमां प्राप्तवती । तत्क्षणं सा कपाटमपावृत्य उन्मादिनी इव चितासमीपं प्राधावत् । गृहे सर्वे आश्चर्यान्विताः । वृद्धप्रभोः आदेशेन तत् क्षणमेव गृहपरिधेः । मुख्यद्वारं दृढतया पिहितम् । वर्षा तत्रैव व्याकुलतया मस्तकं व्रणितवती । रक्तस्नानं च कृतवती । अपरेद्युः वर्षाया मृत्युवार्त्ता परितः प्रसारिता ।

तदनु जनवचने वर्षा सती । सा पतिप्राणा । सा रमणी-शिरोमणिः । सा स्वर्गीयप्रणयस्य अधिकारिणी ।

विलासो भावनामुक्तः ।

इदानीं न काचित् वर्षायाः स्थानमलंकरोति । वर्षायाः प्रतिकृति-नेपथ्ये तु शम्पा अभिनयति । सा पुनः प्रतिष्ठाकामिनी ।

विलासस्य मनोमूले सम्प्रति वृद्धपिता जरत्प्रतिकृतेः आभास एव । तस्य च रक्षणशीलप्रवृत्तौ रजनी अभिशप्ता वनकन्या । किन्तु एकस्मिन् विजनपरिवेशे विलासकृते रोजा एका स्वस्तिकरेखा । विलासस्य प्रथमप्रणये सैव नेदीयसी आसीत् ।.....वाणिज्यस्य प्रथम-लाभांशे विलास एकदा मधुचन्द्रिकामुपभोक्तुम् अट्टशूलमागतवान् । रोजा अट्टशूलस्य आतिथेयी । तद्दिने सा प्रथमतया विलासमुपगता । विलासमनसि रोजायाः दृष्टिः प्रीतिसंचारमकरोत् । रोजाऽपि मनाक् दुर्बला संजाता । रोजानिमित्तम् एतादृशः अतिथिः नवीनो नासीत् । किन्तु अतिथेः व्यवहारः पुरातनो नासीत् । विलासस्तु तदा रोजां पेपीयमान आसीत् । रोजा वारं वारं पृष्टवती ।

— किमभिलषति भवान् ?

विलासमुखे तु स्मितं विहाय नान्यद् आसीत् । स किंचित् दुर्बल-भावेन अपृच्छत् ।

— भवत्याः कार्यसमयः कियान् अत्र ?

— अष्टघण्टापर्यन्तम् ।

— अद्य कतिवादने समाप्येत ?

— रात्रौ अष्टवादने ···।

— तदनन्तरम् आगन्तुं शक्यते ?

— विशेषकर्म किम् ···?

— अस्ति कश्चित् विशेषः ।

रोजाया उच्छिष्टजीवनी अद्य तस्या मनसि पुलकमभरत् । सा चञ्चला अभवत् । यथानिर्दिष्टसमये सा विलासनिकटे उपस्थिता । विलास उपवेष्टुं तामन्वनयत् । पुनश्च अभिजातव्यवहारे रोजा कृतकृत्या अभूत् । विलास आरभत ।

— भवत्या विवाहः संजातः ?

सरलभावेन रोजा अहसत् ।

— नहि ।

— कदा भवेत् ?

— वक्तुं न शक्नोमि ।

— न किमपि चिन्तितवती ?

— का आवश्यकता ?

— सत्यम् उक्तवती ।

विलासः किंचित् हतावेगः संजातः । वक्रीत्या च अवदत् ।

— अहं भवतीमिच्छामि इति चेत् वदेयम् ? रोजा सामान्यमहसत् ।

— अहं विधर्मिणी । तन्न सम्भवेत् ।

— विधर्मिणी नाम यवनी । तदहं जाने ।

— तर्हि, केन प्रकारेण सम्भवेत् ?

— अयि ! काऽत्र वा सामाजिकता ? सर्वे वयं मनुष्याः । अस्माकं संपर्के धर्मः प्रतिबन्धक एव । अन्यथा प्रवृत्तिमुखे सर्वे समानाः ।

विलासस्य उदारतायां रोजा मनाक् प्रसन्ना—किं वा अस्ति धर्मेण ? तथाकथितधर्मपण्डिता अधुनाऽपि ललनासमूहं दासीरूपेण स्वीकृत्य यथेच्छं परित्यजन्ति । इच्छानुसारं व्यभिचरन्ति । धर्मनाम्ना अत्याचरन्ति । बहुरमणीश्च पत्नीच्छलनया स्वीकृत्य दुराचरन्ति ।

तेषामेव उच्छिष्टात् रोजेयं जन्मलब्धवती। सैव इदानीं धर्म्मस्य अवांछितत्वं व्याहरति।

ततः सा विचिन्त्य अवदत्।

— विषयेऽस्मिन् भवान् पुनश्चिन्तयतु।

विलासः दाम्भिकरीत्या अवदत्।

— मम को वा विद्यते प्रतिवक्तुं विषयोपरि? स्वयमहं विचारकः। यदिच्छामि तत् करोमि।

रोजा विचारमूढ़ा आसीत्। हास्येन अभिलाषं प्रकटयन्ती सा बहिर्गन्तुमुद्यता। विलासो बलात् तस्या हस्तमधरत्। निजग्रीवातो हारमानीय तस्या गले आलम्बयत् मुद्रिकां च अंगुल्यां पर्यधापयत्।

सकलविचारोपरि स्नेहपरिणतिः चुम्बनरूपेण तरलिता। तरलसाहित्ये नायकनायिकारतिः इन्द्रधनुषः रङ्गमन्वेषयत्। विधर्मिभावतले मधुचन्द्रिका साधर्म्या अभूत्। स्वस्तिकस्य चतुश्चरणे चन्द्रलेखा अभ्यादाने निमग्ना। रात्रिः अञ्चलं प्रसारितवती।

रोजा आत्मपूर्णा संजाता।

तदनु सा विलासस्य प्रतिश्रुतिं गणयन्ती दिनमनयत्। परं विलासः सर्वं विस्मृतवान्। अनुभवे तस्य लक्ष्यमभूत् नूतनं मधु—नवीनः स्वादः—अभिनवस्पर्शः—। नवकल्पनायां पुनरपि नवीना—। अनुभवपरिसरे यद् आयाति तत् सर्वं सत्—सर्वं विकसितम्। सर्वत्र स्वादः। सर्वेषु वस्तुषु जीवद्रूपता मधुलिप्ता। जीवद्रूपमेव प्रभिन्नम्। इदं च प्रभिन्नं यथार्थम्। अत्र इतिकारः क्षणिकः। नेतिकार आपेक्षिकः। स्वस्तिकार ऐकिकः।

विलासस्य लक्ष्ये अद्यत्वे शम्पा तादृशी महीयसी। स्वादाय एका मानचित्ररेखा। अस्तव्यस्तकार्यप्रपञ्चे सा सूत्ररूपा व्यसनशाखा। इन्द्रियगन्धेषु सैव परिधिहीना विस्तीर्णबालुका। कल्लोलगहने सैका विषमकलिका। निजकृते प्रहेलिका। अन्यस्य कृते रहस्यकुञ्चिका।

निजपश्चिमं विस्मृतवती शम्पा।

सा विश्वसिति निजवर्त्तमानेषु - निजकार्यपुञ्जेषु··· निजलीनभावनासु ·····। इदानीं सा निर्वाचनप्रचारे अभिनेत्री। द्वारं द्वारमुपगच्छति। जनान् बोधयति। महिलासमूहम् उद्बोधयति·····उदघोषयति— विलासः अस्माकं नेता। स एव अस्माकं हितं साधयितुं योग्यः। नगरपालिकायाः परिसरं न केवला नगरी अस्ति। अपितु कियन्तो ग्रामाः सन्ति यत्र नैके दरिद्रा निवसन्ति। नगरपालिका अत्र तु ग्राममयी। ग्रामाणाम् उन्नयनार्थं नगरी प्रतिष्ठापिता। कार्यालयाः निर्मापिताः। कर्मचारिणो नियुक्ताः। ग्रामत आगम्य जना अत्र कर्म कुर्वन्ति। जनसंख्या अत्र वर्धते। नगरीपरिसरोऽपि वर्धते। तद्दिने नगरीपार्श्वे ये ग्रामा आसन् ते इदानीं नगरीरूपेण परिगण्यन्ते अस्माकं तु नगरी वस्तुतः जनपदमेव। जनपदं नगरीतिकथने गौरवमनुभवति जनः। तथैव गौरवदृष्ट्या जनपदस्य केचन नेतारः चयनीयाः। ग्रामपुञ्जे यथेयं नगरी तथैव जनेषु कश्चित् निश्चेतव्यः। अनेके अधुना प्रतिस्पर्धिनः। तेषु विलास उत्तमः। स एव ग्रामजनपदयोः समन्वयं विधास्यति। अतः स विजयीकर्त्तव्यः।

एवं प्रबोध्य संचरति शम्पा। एकदा निशान्तेन सह तस्याः साक्षात्कारः अभूत्। निशान्तः तामुपेक्षितुं नाशकत्। किमपि वक्तुं स तामुपगतः। शम्पा तमुपेक्ष्य गन्तुमुद्यता। किन्तु कुप्यन्ती अवदत्।

— किमर्थं मामनुसरसि ?

निशान्त उपाहसत्।

— किं मे अधिकारः समाप्तः ?

— को नाम अधिकारः ?

— मम सर्वाऽपि सम्पत्तिः त्वया चोरिता।

— एतत्ते कपोलकल्पितम्। यन् मम आसीत् तन्मया गृहीतम्। का ते आपत्तिः ?

— अधुना समयः अस्ति। त्व प्रत्यागच्छ।

— किमर्थम्····?

— गृहं मे रिक्तम्।

— तत्र मे किमस्ति ?

— सर्वम्।

यदि तत्र ममेति किंचित् अभविष्यत् तर्हि गृहं परित्यज्य नागमिष्यम् ।
तर्हि, किमिच्छसि ?
तव मार्गे त्वं निवस । अहं मम मार्गे तिष्ठामि ।
अहो ···, एषा ते चिन्ताधारा अथवा अन्यस्य ?
मम···ममैव···।
न ··न···। चिन्तेयं विलासस्य । तं गृहीत्वा त्वं ···।
विरम···। माऽधिकं जल्प । मम समयो नास्ति । गम्यताम् ।
समीचीनम् । तर्हि गृहाण ते सम्पत्तिम् ।

निशान्तः विचारालयस्य निष्पत्तिपत्रं प्रसारितवान् । शम्पा तत्क्षणं तद् गृहीत्वा स्यूते न्यवेशयत् । विरक्तिकरस्वरेण अवोचत ।
इतः··· गम्यताम् । प्राप्तं मे त्यागपत्रम् । इतः प्रभृति निश्चिन्ततया निवस । धिक् ते धनम् । धिक् ते कार्पण्यम् । धिक् ते सर्वंकारीयमाभिजात्यम् । धिक् ते सचिवालयजीविकाम् ।
शम्पा प्रस्थिता ।

निशान्तः जनपदस्य एकस्मिन् तरुमूले उपविश्य धूमपानाय सन्नद्धोऽभवत् । सम्मुखे तस्य धूमशिखा कुण्डलीं विधाय ऊर्ध्वगामिनी । स्मृतितले तिक्तता । आवेगमूले कार्पण्यदोषः । हृदये कुण्ठा । मनसि अस्तव्यस्तम् आत्मनः पुरागम् । अग्रे साधनार्थम् अस्पष्टा दिक् । विविक्तानुभवे तथापि मनाक् अन्वेषा । किन्तु प्रतिशोधाय अवसरो नास्ति । अनुशोचता च वृथा । धनमस्ति, तेन सर्वं मिलिष्यति । इयं समाश्वस्तिः । बुद्धिरस्ति, अनेन उपायो मिलिष्यति, इयं सान्त्वना । जीवितुम् अवलम्बनानि अनावश्यकानि । परमुपभोगाय संयोगः अपेक्ष्यते । सचिवालयस्य मार्गे पथिकोऽभूत् निशान्तः ।

अपरमार्गतो जनपदं प्राविशत् मुर्मुः । वृद्धकुलमणिः दिनचतुष्टयतः अस्वस्थः । चरमं वयः । देहः पथ्याय न प्रतिपन्नः । जलमपि अनुकूलं न भवति । वायुश्च प्रतिकूलः । स्वादु न रोचते । अपथ्ये रुचिः भवति । संचरणे मनः । परं शरीरे न शक्तिः । इतस्ततो विजल्पति । आत्मानं धिक्करोति । पौरुषं निन्दति । वंशानुक्रमस्य अवनतये दुःखाकरोति । एवं नाना विकृतिकवलितो वृद्धः । ओषधिः हि नोपयुज्यते ।

ओषधिं नवीकृत्य विपणीतः प्रत्यागच्छति मुर्मुः। तस्य सरलभावराशिषु रजनी एकैव प्रतिमा। तस्या वैधव्यं मुर्मुकृते असहयं भवति। तन्नयने तादृशललना हि सीमन्तिन्यः—कर्मक्षमा गृहिण्यः। वैधव्यदोषपरिहाराय स मनसा बहु चिन्तितवान्। किन्तु उपायं न प्राप्नोति। बहुवारं स कुलमणिसमीपे पुनर्विवाहप्रस्तावं समानीतवान्। किन्तु वृद्धः सर्वं प्रत्याचष्टे। पुनश्च स यत् चिन्तयति तत्सर्वं तन्निकटे प्रकाशयितुं साहसं न बध्नाति। तथापि तस्य इच्छा—रजनी वैधव्यदोषतो मुक्तिं प्राप्नोतु। विषयेऽस्मिन् स वृद्धेन सह आलोचितवान्। वृद्धो वदति—मुक्तये उपायो वर्त्तते।

वृद्धः रोगी। तस्य कामना अद्यापि न पूर्णा। को वा पूरयितुं शक्नुयात्। न गृहे कश्चित् उपार्जनक्षमः। यस्तु आसीत् स चिराय दूरंगतः। यद् वा उपार्जनं भवति तत् सर्वं कृषिभूमितः। साधारणव्ययनिमित्तं गृहे सन्ति गावः। मुर्मुः गाः दोग्धि। दुग्धं च विपण्यां विक्रीणाति। शाकव्यञ्जनादिकम् अनेनैव प्रचलति।

अन्नं वसनं च साधारणतया धान्यादिशस्यविक्रयद्वारा सम्भवति। रजनी गृहस्य लक्ष्मीः। सा यत् किंचित् संचिनोति। तस्मात् सा विभज्य गृहव्ययं करोति। पित्रे ददाति। मुर्मोः बाह्यव्ययार्थं च ददाति। पिता प्रतिवर्षं तीर्थाटनं करोति। तन्निमित्तमपि सैव प्रयच्छति। संचितधनेभ्यः अर्धाधिकं पितुः तीर्थाटने व्ययीभवति। तीर्थाटनतः प्रत्यावर्त्त्य पिता यदा अतिथिभोजनं कारयति तदाऽपि रजनी सर्वमपि व्ययभारं वहति। अनेनैव क्रमेण पित्रा सर्वमपि निकटतीर्थं पर्यटितम्। अवशिष्यते पुरी। पुरीयं जगन्नाथपुरी। पिता चिन्तयति यदि देहः समीचीनः स्यात् तर्हि ऐषमः पुरीं यास्यति। तेन सह मुर्मुः रजनी च गमिष्यतः। एतदर्थं वर्षारम्भतो मुर्मुः सर्वमायोजयितुं प्रवर्त्तते। एषमो दीपावली कार्त्तिकपूर्णिमा च पुरीनगरे एव परिपालयिष्येते।

रजनी ऐषमः पुरीं गत्वा प्रथमतया तत्र कार्त्तिकव्रतं पालयिष्यति। शरत्पूर्णिमातः कार्त्तिकपूर्णिमापर्यन्तं मासावधिवासः। रात्रौ उपवासः। प्रातः तारकास्नानम्। दिवा हरिकीर्त्तनम्। पुनश्च पुराणश्रवणम्। मध्याह्ने विश्रामः। अपराह्णे लघुतीर्थानां भ्रमणम्। तीर्थीभूतपुष्करिणीनां जलसंग्रहः। ततः स्नानम्। तदनु दीपदानम्। एवं नानाकर्मसम्पादननिमित्तं धनमावश्यकम्। गोविन्दमाता, कामिनी-

माता, रघोः पितामही, गोपालस्य मातामही, सनातनस्य मातुलानी, मायाधरस्य पितृष्वसा, गीताया मातृष्वसा, सीता-भगिनी, लतायाः भ्रातृजाया—ऐताः सर्वाः प्रतिवर्षं श्रीक्षेत्रं गच्छन्ति। नटवरस्य प्रपितामही इदानीमपि प्रतिवर्षं पुरीं गच्छति। गङ्गाभगिन्या ननान्दा मालती विगतवर्षे विधवा अभवत्। वैधव्यस्य वर्षपूर्त्यनन्तरमेव सा ऐषमः पुर्यां पुण्यं करिष्यति। पञ्चतीर्थेषु स्नानं करिष्यति। अमावस्यायां दीपदानं करिष्यति। महोदधौ तिलतर्पणं करिष्यति। कार्त्तिकपूर्णिमायां शेषस्नानं विधाय गृहं प्रत्यागमिष्यति। अतिथिभोजनं कारयिष्यति। गोभ्यो धान्यदानं करिष्यति। बालेषु मिष्टान्नवितरणं करिष्यति। अनेन तस्या अपुत्रिकदोषः नश्येत्। सा च पुण्यवती भविष्यति।

भगिनी सौदामिनी गतवत्सरे कार्त्तिकस्नानसमये दिवंगता। सर्वे वदन्ति सा मोक्ष प्राप्तवती। तस्या मृतपतिरपि यमदण्डतो मुक्तः। सञ्चितपुण्येन सा अवश्यं स्वर्गे निवसेत्। तथैव मृतकुशासनस्य वृद्धा पत्नी कादम्बिनी सकलतीर्थाटनं कृत्वा अन्ततः पुरीक्षेत्रे आश्रयं विधाय निवसति। हरिनामदीक्षां गृहीत्वा सा सम्प्रति संन्यासिनी। सा अपुत्रिका इति सकलसम्पत्तिं विक्रीय तत्र अन्नभोजनादिकम् अनाथेभ्यो वितरति। पुण्यम् अर्जति।

वर्षेऽस्मिन् बाबाजी-कैवर्त्तः दुहितुः विवाहं तत्र कारितवान्। धनाभावेऽपि वराकः सुचारुतया श्रीक्षेत्रे कन्यादानं कृत्वा पुण्यमार्जत्। जगन्नाथं साक्षीकृत्य तथैव हरि-तैलकारस्य कन्या वीणा स्वेच्छया पीतवास-स्वर्णकारस्य पुत्रेण सह पुरीमन्दिरे एव विवाहं कृतवती। अत्र जातिप्रथायाः विचारो नास्ति। केवलं मनोऽनुकूलता। इच्छानुकूलं सौख्यं च।

कुलमणिः प्रतीक्ष्य उपविष्टः।

मुखे केवलं 'हरि'-नाम। प्रतिश्वासं च 'हरे····हरे'····। कुलमणिः वैष्णवः। एकदा कश्चित् साधुः सहसा उपगम्य तम् अनेनैव महामन्त्रेण दीक्षितवान्। तदनु श्रवणे कीर्त्तने मनने च केवलं नाम। माङ्गलिकमिदं सकलकालिकम्। विश्रामविहीनजीवने मनाक् शान्तये इदमैश्वरिकम्। विश्वासफलके सरलमिदम् आक्षरिकम्। इदं युगे युगे संहतिस्वस्ति-

कम् । एकाग्रप्रवृत्तिमूले आत्ममयमिदं केवलमौलिकम् । भेदाभेदविवेक-वलये इदमभिन्नं संसर्गप्रतीकम् । निद्रितप्रज्ञाचक्रे इदं विवक्तं प्रतीति-साक्षिकम् । विक्षिप्तभावविग्रहे पुनरिदं मसृणितप्रेमसंगणकम् । श्राङ्गरिकमिदं जगदेककम् । नादेषु इदमर्थवद्-विवर्त्तं प्रथमसंज्ञकम् । औषधीमानीय विलम्बेन अद्य गृहमागतवान् मुर्मुः । गृह परितः अन्धकारः । पर्यङ्के सुप्तः कुलमणिः । ज्वलन्ति दीपः । अपरपार्श्वे उपविष्टा रजनी । मुर्मुः रजनीहस्ते औषधिं समर्प्य अवदत् ।

— सम्प्रति जनपदे महान् सम्मर्दः ।

धीरस्वरेण रजनी अपृच्छत् ।

— किमर्थम्—?

प्रगल्भभावेन मुर्मुः अवर्णयत् ।

— जनपदे निर्वाचनं भविता । तदर्थं सभा भवति । जनाश्च भाषन्ते । शृणोमि, अस्माकं भ्राता विलासः तत्र नेता संजातः । स च निर्वाचने प्रार्थी । अन्यः कश्चन वृद्धः तस्य प्रतिस्पर्धी वर्त्तते ।

वृद्धस्य हृत्कम्पः अभवत् ।

— विरम—। तस्य विषये अत्र विचारो माऽस्तु । तस्य नामग्रहणे सर्वम-पवित्रं भविष्यति । याहि,—संकीर्त्तनमारभ्यताम् ।

मुर्मुः आस्तरं प्रसारितवान् ।

रजनी ग्राम्यवीणायां स्वरं संयोजयितुमारब्धा । मुर्मुः मृदङ्ग ध्वनिषु तालमन्वेषयत् । अर्चनं·····वन्दनं—···· प्रार्थनमिति सर्वं नामगाने अन्तरभूत । 'राधे—राधे···राधे···श्याम···! त्वमेव मे सर्वनाम ।' 'सत्यपथे···धर्मपथे गमय मां विधिव्रते—।' प्लावय ते प्रेमपथे—। इत्थं कीर्त्तने विलीनो मुर्मुः । नादस्रोतसि स्वरतन्त्रीम् उत्प्लावयति रजनी । उभयस्य अधरे हास्यधारः स्वर्गीयः । भक्तिरसे मुखविलासोदीर्घ-प्रियः । दृष्टिश्च दीर्घदर्शिनी । उभयत्र अपूर्वपूर्णता । न भेदो, चमत्कारोऽत्र अलौकिकः । क्षणाय आत्मिकः । अन्वेषाग्रे न ब्रह्म न वा संसार, अपितु स्रोतः···निश्चयेन प्रवाहः ।—जन्ममरणबन्धे आत्मलयः । —सुन्दरमधुरयोः वेणुः । शान्तये परमाणुः ।

रात्रिः स्थवीयसि ।

गृहस्य प्रहरिवृत्तिमामूलयन् द्वारदेशे शपनीयम् अभजत मुर्मुः। पितृ सेवा समनन्तरं निजद्वारम् अन्तरायीकृतवती रजनी। अन्तराले सा एकाकिनी। दीपालोकः सूक्ष्मः। प्रकाशस्तु अखण्डः। अवधाने तस्या मायामातनोति शयनकालः। शेषप्रार्थनायां आविर्भवति गोपीप्रियो रसविशालः। अवदमित-प्रवृत्तिसम्मुखे तथापि शृङ्गारी स एव मरालः। कलाप्रपञ्चमुज्जृम्भयन् ग्रासाय उद्यतः संसारोऽयं साक्षाद् व्यालः। ···केलिः यदर्थं कालस्य समन्वयप्रतिभूः। तथापि प्रतिनक्त-मिव इदानीमपि शयने रजनी सुश्रीः।

अपरदिने निर्वाचनफलं घोषितम्। विलासो विजयी घोषितः। ग्रामतो जनपदपर्यन्तं सर्वत्र विलासस्य जयध्वनिः। सर्वत्र पुष्पमाल्येषु विलासस्य अभ्यर्थना। पार्श्वचराणां प्रशंसावचने विलासः अद्य महान् जनसेवी—जननायकः···जनपदस्य च सम्मान्यो नेता।

मुर्मुः आगम्य विलासस्य विजय-विषयं कुलमणिसमीपे विज्ञापितवान्। वृद्धः कुलमणिः सहसा विस्मितः। आत्मना च विषण्णः—अहो कालः! प्रतिपक्षे वृद्धः कृपानिधिः। बहुकालतः सः अस्य जनपदस्य प्रतिनिधिः बहुजनपरिचितश्च केन प्रकारेण स पराजितः? स नीतिवादी—परोपकारी। जनसेवायां तस्य सर्वोऽपि कालो व्यतीतः। तस्य समवयस्कार बहवो धनिनः संजाताः। परं तस्य संप्रति तदेव पुरातनं गृहमस्ति। तदेव जनसम्मानं तन्निकटे अद्यापि विद्यमानमस्ति। देवधर्मेषु साधुकर्मसु च तस्य विश्वासः अक्षुण्णः। तथापि स पराजितः?

विलासो भ्रष्टः। नाऽयं तस्य विजयः। विजयोऽयं धनस्य। तस्य च चातुर्यस्य। पुनश्च तस्य मिथ्याप्रतिश्रुतेः। जनस्तु अन्धः। स धने विश्वसिति। आकर्षणे अनुरज्यति। मिथ्यानिमित्तं संग्रामं करोति। धनमोहे सर्वं विस्मरति। अतः किमपि विचारयितुं न शक्नोति। यत्र किंचित् प्राप्नोति तत्र निजत्वं विजहाति। इदानीं को वा कृपानिधिसदृशान् साधून् पृच्छति? धनं यत्र तत्र चरित्रम्। तत्र आदर्शः। तत्र सर्वमपि मूल्यसम्पन्नम्। अद्य विलासस्य विजयो नाम भ्रष्टाचारस्य विजयः—व्यभिचारस्य विजयः—अन्यायस्य छलनायाश्च विजयः। अद्य तस्य जयध्वनिः नाम शोषणस्य—दूषणस्य—प्रदूषणस्य

जयध्वनिः, तस्येदं जयमाल्यं कुसंस्कारस्य बलात्कारस्य··· वचस्कर वृत्तेश्च ।

विषण्णभावेन विलासस्य विजयकथां रोमन्थयति कुलमणिः । उपगता रजनी ।

— पितः ! मुर्मुः वदति विलासभ्राता जनपदस्य नेता संजातः ।

— स तु तदर्थं विजयी । न अस्मत्कृते ।

— तस्य विजयो नाम अस्माकं विजयः ।

— मैवं वद, जाते ! स इदानीं महान् । वयं तु···।

— विजयेऽस्मिन् अस्माभिः स उपगन्तव्य एव ।

— न—न···। विजयस्य मोहविषयं न जानासि । अस्मिन् समये अस्मान् स परिचेतुमपि न शक्नुयात् ।

— तं विहाय कियद्दिनपर्यन्तं वयमत्र पृथक् स्याम ।

— यावत् शक्यम् । रजनि ! संसारमियं परिचेतुं कुतस्ते वयः ? अस्य रूपमतीव सुन्दरम् । परमत्र सम्पर्कः न तथा मधुराय यथा तिक्ताय ।

— तथापिः सः आत्मीय खलु ?

— एतन्न कोऽपि निषेधयेत् । किन्तु स एतन्न बुध्यति ।

— वयं बोद्धुं समर्था नु ?

— सत्यम्···। परं किमत्र अस्माकं नास्ति ? गृहमस्ति । कृषिभूरस्ति । मुर्मुसदृशः पुत्रवत् सेवकः अस्ति । शान्तिमयपरिवेशोऽपि विद्यते । तर्हि, किमर्थं वयं तदुपरि जीवननिर्वाहार्थं भारसदृशा भविष्यामः । किं जनपदे जीवनं अधिकं सुखप्रदं भवेत् ?

— तत्र गन्तुं नाऽहं वच्मि । किन्तु अस्माकं सम्बन्धः तिष्ठतु ।

— बहुधा मया स बोधितः । स तु निर्बोधः । को वा अस्ति गृहे विवादाय? वृद्धोऽहं वर्षद्वये त्रये वा मरिष्यामि । मम तु सामान्यमितो व्ययः । तत्रापि तस्य असम्मतिः । गृहम्—भूमिः—चलनीया सम्पत् इति सर्वं मयैव अर्जितम् । किन्तु लोभः तस्य । भवत् नाम । तथापि औद्धत्ये सीमा अस्ति । यदि प्रतिपदं सः अनुचितमाचरेत् तर्हि गृहे शान्तिः केन प्रकारेण वा तिष्ठेत् ? वरं स दूरे तिष्ठतु । धनमर्जयतु । यशः सञ्चिनोतु । तत्र अस्माकम् आनन्दः । उपगमने का आवश्यकता ?

यदि तस्य इच्छा अनुकूला भवेत् तर्हि स आगमिष्यति। नोचेत् न·····।

रजनी शनैः गृहं प्रविष्टा। विलासस्य प्रकृतिं विमृशन् कुलमणिः निविष्टः। किमर्थं विलास इयान् प्रकृतिकृपणः संजातः? कथं च स्वभावसंकीर्णः अभवत्? किमयं परिवर्त्तितकालस्य प्रभावः? अथवा पारिपार्श्विकस्थिते। दुष्प्रभावः? अथवा मातृवियोगजनित-स्नेहाभावः? अथवा पितापितामहानाम् अभिशापानुभावः? किं वा असमयसुरतस्य कुप्रभावः?

कारणानि बहूनि। कार्यं तु एकम्। तदेव फलायते - प्रभावं तनुते····अन्यदपि आक्रमते····इतस्ततः संक्रमते - पुनस्तत् कारणायते--- स्रष्टा संजायते---। तदीयो भावः अन्यत्र पुष्प्यति। एवं विशालायते सूक्ष्मता। स्थूले च कारणसन्धानं मिथ्यायते। ततः शून्यं विद्योतते। अभावायते संसारः। अभावे सर्वमपि सम्भाव्यं सद् भवति।

गृहे शान्तिस्थापनार्थं कुलमणिः निजजीवने बहु त्यक्तवान्। इयं शान्तिः तस्य आदिलक्ष्ये अन्यतमा। विलीना कालवक्षसि पत्नी। परमुभयस्य मध्ये एकदिनमपि कलहो नाऽभूत्। अभाव आगतः। कदाचिदपि धैर्यच्युतिः नाऽभवत्। केवलं शान्तये कन्या रजनी तन्निकटे चिरकुमारी। पुत्रो विलासश्च चिराय प्रवासी। पुनश्च मानवताया मूलसूत्रम् अन्विष्य स मर्मुमुखे हरिनाम अभरत्। तदिदानीं शान्तये स्पृहां जनयति। अद्य तु निजकृते जपमाला शान्ति-स्वरूपिणी। कन्यायाः कृते पूजामञ्जरी शान्तिप्रतिमा। निखिल-कर्मणो लक्ष्यमूले द्वयं शान्तिः तदर्थं सत्यस्य परावाक्।

पूर्वाकाशं दर्शं दर्शं पिनानि नयति कुलमणिः। जीवनारम्भतः पूर्वाकाशेऽस्मिम् तस्य अनेकप्रीतिः। किमर्थमिति स न जानाति। अत्र यथा शून्यरागः तथा मेघरङ्गः। तथैव च उज्ज्वलिमा। बाल्ये स प्राङ्-मुखः सन् दीक्षामग्रहीत्। निर्नामसु अत्रैव मुख्यरूपमभजत नाम। ततो नाम्नि स सौन्दर्यमन्वेषयत्। रूपमादकतायां संसारो मधुरतमः अनु-भूतः। अद्य तु स एव पूर्वाकाशः। तथैव तत्र मेघः। तथा च रङ्गः। परं न रूपे माधुरी। न वा रंगे आवेगः। शिथिल प्रत्यङ्गे आश्रयलिप्सा महती। कल्पनासु नामलीला ऐश्वरिकी। निमीलने सूर्यः पारम्प-रिकः। उन्मीलने चन्द्रो विरतिरङ्कः। आशासु प्रस्थानं श्वासायते।

ध्रुवायते प्लवमानता । निमेषे दिनम् । निमेषे च रात्रिः । रतिमात्रा सूक्ष्मायते । वाजीभवने निजायते आत्मा । दाहार्थं प्रतीक्षते देहः । शिखायते संस्काररेखा । शेषभिक्षा पुनर्भवपरिक्षेपाय प्रेयसी ।

अवसरे मुर्मुः भावनाविलीनः । तन्नयने शोभामातनोति ग्रामकुटीरस्य छदिः । तत्र च कुक्कुटानां केलिः । पुनश्च आर्द्रछदिषु धूमकुण्डली । तन्मानसं पुलकयन्ति ग्रामस्य उत्सवाः·····परिपार्श्वकर्षकाणां समाचाराः । ऐषमो दामोदरस्य पुत्रविवाहो भविष्यति । आगामिनि वर्षे यदुमणेः कन्याविवाहो भविष्यति । नित्यानन्दब्राह्मणस्य उपनयनोत्सवो गतमासे अभूत् । सूर्यमणिनापितस्य मातृवियोगे अद्य शुद्धिदिवसः । गदाधरस्य भगिनी सद्यो विधवा संजाता दाशरथिमिष्टकारस्य कन्या पापगर्भं निपात्य बहुकष्टेन विवाहं कृतवती । पूर्णतन्तुकारस्य भगिनी पतिपरित्यक्तारूपेण गृहे सीदति । गोपालदासः कन्याधननिमित्तं कलहेन पत्नीं व्यापाद्य अधुना कारागृहे कालं नयति । निधिब्राह्मणस्य विशालपरिवार ऐषमो विच्छिद्यः । भीमक्षत्रियः पापकर्मनिमित्तं नितरां पीड़ितः । धरणीधरस्य पत्नी बन्ध्या इति सदा तयोः कलहः । नटवरस्य पत्नी अष्टमगर्भे पुत्रं प्रासूत । शङ्करमहाजनः ग्रामस्य मन्दिरनिर्माणार्थं किंचिदधिकं धनं दास्यति इति प्रतिश्रुतवान् । हरिजना ऐषमः सर्वकारतः ऋणं लब्ध्वा आषाढ़ मत्स्या इव दृश्यन्ते । निर्वाचनं निमित्तीकृत्य ग्रामः अधुना द्विधा विभक्तः ।

ज्योतिषिकः कृष्णदासो वदति—अस्मिन् वर्षे प्रचुरं शस्यं भविष्यति । गतवर्षे शस्यहानिरभूत् । अतो हानिसम्भावना नास्ति । किन्तु वृष्टिभयमस्ति । कीटभयमपि अस्ति । वर्षेऽस्मिन् करकापातयोगोऽपि वर्त्तते । इत्थं नाना कथाः । मुर्मुः यत्र गच्छति तत्र ग्राममेव चिन्तयति । ग्रामस्य परिसीमा तदर्थं चिराय अभिरामा ।

समयः सन्ध्या ।

अलिन्दे आलम्बमानो वृद्धः । कटस्य पार्श्वद्वये उपाधानोपरि मस्तकं चरणं च निधाय कुलमणिः श्रममपनुदति । निकटे उपविश्य चरणं संवाहयति मुर्मुः । तैलेन पृष्ठतः चरणपर्यन्तं आमर्दयति । मध्ये मध्ये

गृहविषये, कृषिविषये ग्राममधिकृत्य स आलोचयति । आगामिदिनस्य कार्याणि च निरूपयति । प्रसंगक्रमेण मुर्मुः वदति ।

— पितः ! ह्यः भास्करक्षत्रियः अश्वत्थवटद्रुमयो विवाहं कारितवान् । लोकाः कथयन्ति—अनेन तस्य अपुत्रिकदोषो नश्यति । किमिदं सत्यम् ?

— हाँ ···। स वृक्षद्वयं मूलत समेधितवान् । तस्य आशा आसीत्, स पुत्रवान् भवेदिति । पुत्रस्तु न जातः। अधुना पुत्ररूपेण वृक्षद्वयं स्वीकृत्य शान्तिमाप्नोति । यदि कश्चित् मनुष्यमारोपयेत् तर्हि स किं प्राप्नुयात् ? मम तु पुत्रो विद्यते । किमहं प्राप्नोमि ? वृक्षरोपणे फलं यदि न मिलेत् छाया तु नूनं मिलिष्यति ।

— सत्यम्····। पुनश्च केचन कथयन्ति—अस्मिन् वर्षे विजयमहाजन एकां पादपीं परिणीतवान् । स तु विशालजनः । वराको वारत्रयं परिणीतवान् । किन्तु तिस्रः भार्या मृताः । वराको मृतदारः संजातः । अस्मादेव दोषात् परित्राणाय स चतुर्थवारं पादपीं पर्यणयत् । तदा प्रभृति स सुखेन निवसति । तथैव यदि भगिनी पादपं परिणेष्यति तर्हि साऽपि वैधव्यदोषात् मुक्ता भविष्यति । मा पुनरपि सीमन्तिनी भवेत् । अनेन न कस्यापि हानिः । अपितु भगिनीमनसि दुःखस्य उपशमो भवेत् ।

सेवकस्य प्रास्ताविकतर्के वृद्धः चिन्तानिविड आसीत् । तं समाश्वस्य सः अभाषत ।

— भवतु···। विषयेऽस्मिन् विचारं प्रवर्तयिष्यामः । इदानीं गवां रात्रिभोजनसमयः । याहि, रजनीम् आहूय शीघ्रं तत् व्यवस्थापय ।

संवाहनं तत्रैव समाप्य मुर्मुः निजकर्मणि व्यापृतः । रजनी वृद्धस्य भोजनव्यवस्थां कृत्वा शय्यां प्रसारयत् । रात्रिः रामेश्वरी अभूत् ।

अभ्युदये पूर्वाह्णं मनोहरम् ।

विलासस्य अभिनन्दनपत्राणि सज्जीकरोति शम्पा । तदपि वाचयित्वा विलासं श्रावयति । उभयस्य मुखे हास्यम् ऐकिकम् । विलासो वर्णयति ।

— शम्पादेवि ! वस्तुतः, भवत्या एव अयं विजयः ।

— न····न····, भवत एव ।

— भवत्या अभियानं कौशलपूर्णमासीदिति सर्वे वदन्ति । विलासोऽयं नाम्ना विजयी । भवती तु कर्मणा····।

— स्थापयतु वचनमिदम् आत्मनि ।

— किमर्थम्····? किमिदं चाटुवचनम् ? अहं तु यथार्थं वच्मि ।

— भवेत्····। मम कर्त्तव्यं तु मया कृतम् । तदर्थम् इयती प्रशंसा ?

— भवतीं विहाय को वा अन्यः तथाभाक् ?

— सन्ति अनेके ।

— नहि····द्वित्रा एव ।

— किमेते आत्मीया ?

— आत्मानुरूपाः ।

— तेतां नामानि····?

— प्रथमनाम शम्पा····।

— द्वितीयं·····?

— रजनी····।

— अहो, जाने ··, भवतो भगिनी किल ? भवतु, तृतीयं ·····?

प्रश्नेऽस्मिन् सहसा विरतो विलासः । मनसि अभासत रोजा । सा एका मधुस्मृतिः । प्रथममृगयाकाले सा प्रथमस्थली । ·····सरल-वाणिज्ये सा प्रथमपिपासा । ·····दुर्बलमुहूर्त्तस्य अस्वस्थपाण्डुलिपिः ।

विलासस्य अधरे हास्यरेखा उज्ज्वला ।

शम्पा साश्चर्यमपृच्छत् ।

— नीरवता·····। तदनु हास्यम्·····। किं चिन्तयति ? किमिदं तृतीये नाम·····?

— रोजा ·····।

— कुत्रत्या इयम्····?

— महान् अयं विषयः । अन्यदा वदिष्यामि । इदानीं कः कार्यक्रमः ?

— कथयतु विषयमिमम् ।

शम्पामनसि द्विधाभावः। किन्तु प्रीतिपूर्णनेत्रेण सा विलासस्य मुखमपश्यत्। रतिनिवेदनस्य अपूर्वभंग्या सा किमपि छलयितुमुद्यता। विलासस्तु अभिज्ञः। अनुभवे तस्य गतानुगतिका इन्द्रियप्रीतिः। तन्निकटे देहो विशालः··· रसालः··· केलितरलः। शम्पायाः चिबुके अंगुलीं संतरयन् स अवदत्।

— प्रिये ··! परिहासविजल्पितमिदम्।

— नहि···नहि···, वदतु नु···।

समयेऽस्मिन् निशान्तस्य अभिनन्दनपत्रम् उन्मोचितवती शम्पा। सहसा स्तब्धा। हृदयस्य स्पन्दनं तस्याः शरीरमाक्रमत। सा पत्रमिदं निह्नोतुमयतत। विलासः; किन्तु, सन्देही भूत्वा अपृच्छत्।

— किं तत्र निह्नुतम्?

— निशान्तस्य प्रलपितम्। न तत्र किमपि अस्ति। त्यजतु···।

— न··· न···, वाचयतु।

— नहि···।

— महयं ददातु। स्वयं पठिष्यामि।

बलात् पत्रमगृह्णत् विलासः। वाचयितुं च आरब्धः।

'विलास—!

अभिनन्दनम्। त्वं मे बन्धुः। मदर्थं अनेकं कृतम्। कथं वा विस्मरिष्यामिः? कर्मपरिसरे त्वमागतः। लाभांशं गृहीतवान्। अन्ततो वाणिज्यच्छलेन सर्वं मे चोरितवान्। अद्य अभिनन्दनस्य मूल्यं कियदिति त्वं सम्यक् जानासि। अयं विजयो न तव। विजयो धनस्य ——तव वणिग्वृत्तेश्च। यद् भवतु नाम, शम्पा इदानीं त्वन्निकटे नूनं सुखिनी स्यात्। अहमिह तु रुग्णः संजातः। अद्य सहायनिमित्तं न कोऽपि निकटे। यदि रोगपीड़ा अधिका भवेत् तर्हि सहायार्थं करं प्रसारयिष्यामि। मम करप्रसारे त्वं सहायो भविष्यसि इति आशासे।

त्वदीयो बन्धुः

निशान्तः।'

पत्रं पठित्वा दीर्घश्वासमगृह्णात् विलासः। काचित् विकृति-रेखा कपाले तस्य स्पष्टा अभवत्। शम्पा तु तस्य मुखं विलोक्य वाक्शून्या आसीत्। इदानीं हृदये तस्या अतीतस्य स्पन्दनम्। मनसि अनुतापस्य क्षीणरेखा। किमर्थं सा निशान्तं परित्यक्तवती? को वाऽत्र विशेषः? यं सा प्रीणयति स्म स तु अन्यत्र लग्नः। आत्मनि आधुनिक-प्रवृत्तिं वहन्ती यत् सा अद्य प्राप्नोति तत्र किं मूल्यम्? केवलो बहुजनसम्पर्कः—किंचित् प्रभुत्वम्—किंचिन् नेतृत्वम्····। अत्र सा किं पुनः प्राप्तवती? अपरं तु उभयस्य हानिं सम्पादितवती। निशान्तस्य धनलिप्सां सैव वर्धितवती। विलासस्य यशोलिप्सां सैव अग्रे कृतवती। एवमनुचिन्तया शम्पा खिन्ना।

मनोभावं विपरिवर्त्य विलासः अवोचत।

— अयि! किं विभावयसि?

— उँ—। न किमपि····।

— अनुचिन्तया किम्? जनपदनिर्वाचने विजयः किं विजयः? मास-द्वयाभ्यन्तरे राज्यस्य निर्वाचनं भविष्यति। तत्र यदि विजयो न स्यात् तर्हि धनस्य पुनरागमः कथं स्यात्? सामान्यनिर्वाचने यद् व्ययितं तत्तु नष्टमिति चिन्तय। इदानीं वातावरणम् अनुकूलम्। जनाः परिचिताः। पार्श्वचराः प्रसन्नाः। सम्प्रति पुनरभियानं कर्त्तव्यम्। किम् एतावति भवती क्लान्ता?

— नाऽहं क्लान्ता····।

— अथवा काऽपि प्रार्थना अस्ति?

— अस्ति।

— प्रार्थनया किम्? यद् अर्जितं यद् वा उपार्जनं भवेत् तत्सर्वस्य का वा अधिकारिणी? किमर्थं वा मया इयान् यत्नः क्रियते? कथं च एतदायोजनम्? को वा एतद् अवबुध्येत्।

शम्पा तु चिन्तारूढा। तथैव च स्थिरा। विलासः प्रगल्भ-भावेन वदति।

— संसारेऽस्मिन् न कश्चिन् मे तथा आत्मीयः। वाणिज्यं करोमि। धनमुपार्जयामि। जीवामि ·····केवलं जीवामि। मम सकलकर्मणः प्रेरणामूले भवती एव दण्डायमाना। इदानीं तु·····।

— चिन्ता माऽस्तु । मदुपरि यद् दायित्वं तदहं चारुतया सम्पादयिष्यामि ।

वचनेऽस्मिन् विलासः समाश्वस्तः । किंचित् उदासीनतया अवदत् ।

— शम्पादेवि ! इदानीं भवती श्रममपनयतु । अस्माकं प्रकल्पविषये पुनरपि विचारयिष्यामः ।

शम्पादेवी अलसभावेन उत्थाय अपरप्रकोष्ठं गतवती । मनसि तथापि निशान्तो जालं विस्तारयति । इतः पुनः विलासः प्रियतरः प्रतिभाति । सा अनुभवति—नयनद्वयमध्ये सा यथैका सेतूयमाना नासिका···एका अन्तःशून्या प्रणाली ···गन्धमात्मसात्कुर्वाणा उच्छिष्ट-प्रणालतटे एका निमग्नदूर्वा ——— ।

विलासो गम्भीरः ।

अपराह्णस्य कृष्णजलदः सूर्यमाच्छादयत् । कश्चित् परिचारक आगम्य व्यज्ञापयत् ।

— बाबो ! निर्वाचने ववान् विजयी । किन्तु शिल्पायनस्य कर्मकराणां कृते भवतः प्रतिश्रुतिः न पूर्णा । ते असन्तुष्टाः । इतस्ततश्च कोलाहलं कुर्वन्ति । आगामिसप्ताहे कर्मरोधो भविष्यति ।

विलासः सतर्कमवदत् ।

— याहि···। अवबोधय तान् । यदि कर्म न करिष्यन्ति तर्हि वेतनं न मिलिष्यति । किन्तु आगामिसप्ताहे तेषां प्रार्थना पूर्णा स्यात् ।

तदनु अन्य कश्चित् न्यवेदयत् ।

— वाज्यिसंस्था अचला भवेत् । भवान् तु निर्वाचननिमित्तं संस्थाया मूलधनं स्वीकृतवान् । इतः कर्मकरा उपवासेन व्याकुलाः । ते यदि वेतनं न प्राप्स्यन्ति तर्हि संस्थातः सर्वमपि चोरयिष्यन्ति ।

— भवतु, सप्ताहाभ्यन्तरे एव तेषां वेतनं मिलिष्यति ।

अपरः कश्चित् प्रार्थितवान् ।

— भवान् विजयी इति अभिनन्दनम्। किन्तु ···अस्माकं संस्थाया ऋणधनं कदा मिलिष्यति ?

— चिन्ता कथम् ? अचिरमेव सर्वं समर्पयिष्यते।

ततः केचन जनाः सम्मिलिताः। ते प्रार्थयन्।

— अस्माकं वसतौ पानीयं नास्ति ···विद्यालयो नास्ति ·· चिकित्सायाः सौविध्यं नास्ति ···मार्गोऽपि समीचीनो नास्ति। भवान् युवा। सर्वमपि कर्तुं प्रभवसि। तर्हि, कदा ··अस्माकम् ·· उपरि दृष्टिः·····—।

— सर्वं करिष्यते। एतदर्थं समयः अपेक्ष्यते खलु। सर्वं लिपिबद्धम्। भवन्तो गच्छन्तु। यथाशीघ्रं सर्वं सम्पादयिष्यन्ते।

केचन निर्वाचनकर्मकराः प्रतीक्षमाणा आसन्। ते अवदन्।

— अस्माकं पारितोषिकं कुत्र ? वयं तु नाधिकं कामयामहे। किंचित् पानीयम् ····।

— भवतु ···। किमर्थं केवलं तत् ?

सर्वे अहसन्। कर्मकराः प्रस्थिताः।

अपरे व्यज्ञापयन्।

— अस्माकं भूमिविवादः इदानीमपि तथैव वर्त्तते। कदा समाधानं भवेत् ? भवान् छन्दाकलनसमये समाथानाय उक्तवान्। परं दर्शनं नास्ति। अन्याश्च समस्याः सन्ति। तासामपि समाधानम् अपेक्ष्यते। अतो भवान् अस्माभिः सह आगच्छतु।

— नूनं गमिष्यामि। अचिरमेव सर्वस्य समाधानं भवेत्। अधुना समयो विरलः। आगामिसप्ताहे आगच्छन्तु भवन्तः।

युवसंघस्य केचन युवकाः समागताः। ते उच्चैराक्रोशन्।

— विलासभ्रातः ! अस्माकं पारितोषिकं कुत्र ?

— दास्यते ···।

— भवान् तु जानाति—वयं कीदृशाः। चिन्तयामः, अस्माकं भाग्ये नियुक्तिः नास्ति। उपाधिः व्याधिः भवति। अस्माकं जनपदे तु बहिस्थाः नियुज्यन्ते। केयं नीतिः ? पुनश्च ते भृशम् उत्कोचं गृह्णन्ति। कार्यालयद्वारे अस्मत्पादस्थापनमात्रेण तेषां कोपः वर्धते।

यथेच्छं ते भर्त्सयन्ति। व्यवहारमपि न जानन्ति। तेषां विताडनं प्रथमतः कर्त्तव्यम्।

— भवन्तः किं कुर्वन्ति---?

— अस्मद्द्वारा तन्न सम्भवेत्।

— कथं न सम्भवेत्। भवन्तो युवानः। यथेच्छं कर्त्तुं समर्थाः। यत् कर्त्तव्यं क्रियतां नाम। अहं पश्चाद् अस्मि।

एवं प्रतिश्रुतिषु प्रपूर्यते दिवा। सन्ध्या समायाति। मधु-समारोहे सहचरैः सह व्यतीयते रात्रेः प्रथमप्रहरः। ततः सहचराः प्रशंसावचनैः शुभानि अभिवर्षन्ति। परामर्शच्छलेन ते हिताकांक्षिणः संजायन्ते। ततो विलासः निजत्वं विस्मरति। यो यद् वदति तदेव तन्निकटे सत्यायते। अन्यत आत्मनो विरोधाचरणं श्रुत्वा क्रमशः स हिंस्रो भवति। सकलविचारः केवलं प्रतिशोधकर्मणि पर्याप्तिमेति। प्रतिशोधप्रकल्पे धनव्ययनिमित्तं योजना स्थिरा भवति।

निशार्धे आसर उद्यापितो भवति उन्मत्तविलासः मद्यकूपीतः शेषबिन्दु समापयति। ततः शम्पायाः प्रकोष्ठं प्रविशति।

प्रातः आयाति।

मनोज्ञवर्षणस्य शेषभागे शरत्सरित् स्थिरायते। अंकुरान् पादपयति धरणी। नीवारमस्तके लहरीं सन्तरयति समीरः। कुमारीयति सरणिः। वेलायते गुल्ममाला। शैवालानि जलानि पिवन्ति भग्नमन्दिरस्य निश्चूर्णप्राकारे। अलिन्दमूले भूकीटाः कपटपटवः।

कार्त्तिमासो निकटायते।

मुर्मुः आयोजने मग्नः। स पुरीं गमिष्यति। जगन्नाथस्य दर्शनं करिष्यति। पापं क्षालयिष्यति। महोदधौ स्नानं करिष्यति।दुष्कृतानि नाशयिष्यति। साधुसज्जनानां सम्मेलने कियत्कालं यापयिष्यति। मनः परिवर्तनं करिष्यति। इदानीं तत्र मासावधिवासः। व्रतं च दिनपूर्णम्। कीर्त्तनमपि तथा। सदैव कर्म। कदा वा क्षान्ति? ।संप्रति विश्रामो मिलिष्यति। स्तोकं निश्वासाय कालः। किंचित् उपवेशनाय

अवसरः । सेवापूजार्थं च अवसरः । धनधर्मादीनामर्जनार्थं न पुनः काल आगमिष्यति । यन्नभवेत् वयसि अस्मिन तन्न भवेत् काले कस्मिन् ।

वराको नीलमणिः ऐषमो गन्तुं न प्रभवेत् । वृद्धः कियन्न मनस्यति स्म ? रोगात् उत्थितोऽपि स पुनश्च रुग्णः संजातः । भाग्ये नास्ति । स किं करिष्यति ? यदि जगन्नाथस्य करुणा न भवेत् तर्हि मनुष्यः किं कुर्यात् ? दैवायत्तं जगत् सर्वम् । भवतु, आगामिनि वर्षे गमिष्यति । किन्तु अस्माभिः सह गन्तुं तस्य मनः । किं भवेत्, ईश्वरो जानाति ।

तथैव इन्दुमति वृद्धा सदा पृच्छति—'अरे ! पुरीं प्रति गम्यते ।' वराकी ग्रामेऽस्मिन् जीवनमतिवाहितवती । सकृदपि पुरीं न गतवती । को वा जानाति किं तस्या भाग्ये अस्ति । वृद्धा प्रतिवर्षं गमनार्थं धनं संचिनोति । किन्तु तस्याः पुत्रः कलहं कृत्वा सर्वं नयति । मध्ये मध्ये साऽपि कन्यागृहं गत्वा अवशिष्टं धनं तस्यै दत्वा प्रत्यागच्छति । कन्यायां वृद्धाया महान् स्नेहः । सा प्रतिमासं कन्यागृहं गच्छति । कन्या अपि तथा । सा मातरं सेवते । जामाता च श्रद्धते । प्रायः, वृद्धा तत्रैव मरिष्यति । श्रीक्षेत्रदर्शनं किं सर्वेषां भाग्ये अस्ति ? ये पुण्यवन्तः ते गच्छन्ति । केवलमभिलाषमात्रेण किं भवेत् ? इच्छा तु ईश्वरस्य·····।

एवं चिन्याबाहुल्ये चञ्चलो भवति मुर्मुः । शरत्पूर्णिमा निकटायते । तत्पूर्वेद्युरेव यात्रारम्भो भविष्यति । ततः पूर्वं मासव्ययमितं तण्डुलं, चिपिटकं, लवणं तथा च नाना द्रव्याणाम् आयोजनं कर्त्तव्यं भवति ।

कुलमणिस्तु दिनान् गणयति ।

विलासो न प्रत्यागतः । न प्रत्यागच्छतु नाम । स कार्यस्य प्रतिबन्धको भवेत् । मुर्मुः अस्ति । स इह सहायकः । रजनी प्रथमतया पुरीं गमिष्यति । तदर्थं स्वतन्त्रनिवासः अपेक्ष्यते । इयद्धनं व्ययीकृत्य भाटकरूपेण स्वतन्त्रगृहव्यवस्था तु सहनीया न भवति । गृहमिव एकस्मिन्नेव प्रकोष्ठे कार्यं चलिष्यति । सा च प्रथमवारं कार्त्तिकव्रतं पालतिष्यतीति तदर्थं स्वतन्त्रदृष्टिरपेक्ष्यते । कन्या सा संप्रति प्रकृष्ट-

वर्त्मनि । अतः प्रवृत्तेः भयं नास्ति । तीर्थस्थाने तु चौरा असंयता पुरुषाश्च सदा सन्ति । अनिष्टमपि कारयन्ति । सावधानतया यत् कर्त्तव्यं भवेत् । तदर्थं मुर्मुः आदेष्टव्यो भवेत् । भवतु···, यथा योगः तथा भोगः ।

एतद् विचिन्त्य कुलमणिः गम्भीरः । कार्त्तिकमासे महालया श्राद्धः । पितापितामहानां दृष्टिः तत्रैव । ते एकवर्षे सकृत् अस्मिन्नेव समये गृहमागच्छन्ति । गृहं पावयन्ति । तेषां स्वागतनिमित्तं कश्चन समारम्भः कल्पयितव्यः अन्यथा ते असन्तुष्टा भवेयुः । इयमस्माकं परम्परा । वयं यदि तान् पूर्वजान् नोद्धरेम के वा अन्ये तत् कर्त्तुं समर्थाः ? प्राग् वयम् अकुर्म । इदानीं किमर्थं परित्यक्ष्यामः । पुण्यक्षेत्रे तेषां श्राद्धः अवश्यं समापनीयः । अस्मत्परं यद् भवतु नाम संप्रति अस्माकं पितापितामहानां मातामातामहीनां स्मरणे का हानिः । परस्य अनिष्टचिन्तया कालो गच्छति । परम्परायाः स्मरणमात्रं कथं न सम्भवेत् ? अनेन सत्यरक्षा स्यात् । व्रतानुकूलप्रतिश्रुतेश्च वरिपालन भवेत् । अनेनैव माध्यमेन सानसिकी शान्तिः पवित्रता च उत्पद्येते । तत आधिनाशः । जीवनस्य च भारसाम्यम् ।

समयः पलितः ।

प्रतिक्षणः रतिप्रतीतिः । सर्वत्र तदेव नाम, सैव च आकृतिः । नेन्द्रियं न वा शरीरमद्यत्वे प्रवृत्तिपथे । अवयवे भंगी आत्मिकी । उद्देश्यमूले प्रीतिः पारमार्थिकी । नयने विरहवंशी । मनसि कदम्बमूलस्थ वसन-राशिः । हृदये गोपीभावः स्थायी । मन्थररोमन्थने जप एव विषयी । निकटे दृश्यराशिः न विकृतिः अपितु प्रकृतिः—स्वयं महती । रजनी शिथिला···पुरतः—परितश्च ।

जननयने रजनी उन्मादिनी । सा विकृतस्वभावा । सा काम-रोगपीड़िता । सा आधिव्याकुला । ····न कुत्र गच्छति । न कया सह जल्पति । न वा स्वभावसुलभकर्माणि करोति । केवलं हरिं भजति । नाम जपति । हे कृष्ण—! हे कृष्ण—इति गायं गायं नृत्यति ।

अपरे वदन्ति— वृद्धकुलमणिः सन्न्यासिनमाहूय तामदीक्षयत् । तदनु सा सन्न्यासिनी । गृहं सा मठरूपेण पर्यणमयत् । अन्ये कथयन्ति

कश्चित् तान्त्रिकः तां वशीकृत्य इत्थमुन्मादयति । अतः सा हसति—विलपति—नृत्यति—गायति । गिरिजन बालको मर्मुरपि तया सह प्रमत्तः संजायते । को जानाति, का वा शान्तिः मन्त्रे वर्त्तते यया एते सर्वे उन्मादिता ?

कृष्णशृङ्गारे रजनी प्राणपूर्णा । अद्यत्वे नित्यकर्म्मणि न तस्याः स्पृहा । अतः सर्वत्र विलम्बः । सदा च अलक्ष्येन अवहेला । किं पुनः कर्मणि अस्ति ? निष्कर्मणि सा शान्तिं प्राप्नोति । गतानुगतिकं कर्म तदर्थं न रुचिकरं भवति । अतः इष्टकुटीरे कालं यापयति । दिनं विस्मरति । स्वप्नमपि परित्यजति । वचनमात्रं कृष्ण—! कृष्ण—!

अतो मुर्मुः पाकशालातो गोशालापर्यन्तं सर्वाणि कर्माणि करोति। स्वयं पचति । स्वयं च भोजयति । रजनी अद्यत्वे तदर्थं देवी । वृद्धः कुलमणिश्च महादेवः । स्वयं स गृही—गृहस्थः—गृहपतिः । एकपार्श्वे जरत्पिता । अपरपार्श्वे स्वभावशिथिला भगिनी । मध्यस्थः स प्रभुः स्नेहस्य—आदरस्य—उदारचरितस्य—। स लालयति—पालयति—निभालयति—।

शरत्पूर्णिमायाः पूर्वेद्युः ।

मुर्मुः चञ्चलः । मनसि नाना चिन्ताः । जगन्नाथः तन्निकटे कुतूहलस्य विषयः । जगन्नाथो निखिलस्य निभालकः । तत्समीपे जातिभेदो नास्ति । स्पृश्यास्पृश्यचिन्ता न वर्त्तते । उच्छिष्टानुच्छिष्टविचारो नास्ति । धनिनो दरिद्राश्च एकस्मिन् पात्रे खादन्ति । तमेव प्रपूज्य विधर्मिणोऽपि संसारात् तीर्णाः । पापिजना मुक्तिं प्राप्तवन्तः । देवदास्य तस्मिन् च विलीनाः ।

अपरे वदन्ति यः पापात्मा तत्कृते जगन्नाथ आत्मानं न दर्शयति । तस्य प्रसादश्च तदर्थं विषायते । पुनरपि, यः पतितः, किन्तु भक्तः, स तस्य पतितपावनपताकां दृष्ट्वा मुक्तिं प्राप्स्यति । इत्थमनेके मुक्ता इति किंवदन्ती । स्वयं जगन्नाथः सैनिकरूपेण युद्धे अवतरति इति पुण्यकथा सर्वेषां मुखे शोभते ।

पिता तु कथयति—प्रतिमात्रयं तत्र विद्यते । एतेषु एकः संसारः। अपरः परमार्थः । मध्य देवी माया । सा उभयमध्ये यवनिका ।

यदा यवनिका अपैष्यति तदा मोक्षः। पुनश्च सः कथयति—जगन्नाथ-कल्पना एका नदी-कल्पना। सुभद्रा स्वयं नदी प्रवाहरूपा। बलभद्रः जगन्नाथश्च मिलित्वा कूलद्वयम्। यदा प्राणी मायावशो भवति तदा जन्म लभते। यदा च मायातो विमुच्यते तदा मोक्षं प्राप्नोति। वस्तुतो जीवः नद्यामेव सन्तरति। तदर्थं संसारधारा मोहिनी संजायते।

पितुरुपदेशं श्रावं श्रावं भगिनी वदति—संसारनदी भयङ्करी। अस्याः पारनिमित्तं नामैव नौका। नामाऽत्र त्रयस्य। बलभद्रः, सुभद्रा, जगन्नाथ इति त्रितयं नाम। नाम्नो मूलाक्षरं वीजम्। 'ब-सु-ज' इति नामत्रितयस्य ऐकात्म्येन प्रतीतिः। अन्ततो 'वसुजाय नमः' इति जपे आनन्दः।

पिताऽपि गम्भीरभावेन उपदिशति—जगन्नाथस्य तत्त्वं गहनम्। जगन्नाथः स्वयं पुरुषोत्तमः। क्षेत्रमिदं पुरुषोत्तमक्षेत्रम्। कोऽयं विशेष इति प्रश्ने स वदति—'पुरुष एवेद यद् भूतं यच्च भाव्यम्'....। वर्त्तमानम्—अतीतं—भविष्यच्च पुरुषस्य परिचयः। पुरुषो नाम त्रिकालस्य समष्टिः। संसारे पुरुषद्वयस्य प्रसिद्धिः। एकः क्षरपुरुषः। अपरः अक्षरपुरुषः। क्षरो नश्वरः। अक्षरो आपेक्षिकनश्वरः। उत्तम-पुरुषस्तु अन्यः। स परमात्मा। सः अन्तिमः। अत्र उत्तमपदार्थः अन्तिमार्थं प्रकाशयति। न तु श्रेष्ठ पर्याये कोऽपि अर्थः उत्तमशब्दार्थः। पुनश्च उत्तमपुरुष इतिकथने अन्तिमपुरुषः प्रतीयते। यथा—भवान् प्रथमपुरुषः। त्वं मध्यमपुरुषः। अहम् उत्तमपुरुषः। मत्तः परं कोऽपि तथा पुरुषो नास्ति। अत्र अहमास्पदता उत्तमपुरुषस्य आधारभूः। सर्वत्र अहमास्पदतायाः स्वतन्त्रता अस्ति। यदा कश्चित् 'अहम्' इति उच्चारयति तदा स सर्वतो विच्छिन्नो भवति.....स्वतन्त्रो भवति। इदं च स्वातन्त्र्यं त्रिकालस्य परिधिमध्ये विद्यते। अतः 'अहम्' इति उच्चारणं कालमिह अङ्कीकरोति। कालिकं च संजायते। परं जगन्नाथः कलयति। अतः कालस्योपरि कश्चन नियन्ता सः अन्यः...उत्तमपुरुषः....अन्तिमपुरुषः।

नैर्मल्यमत्र पुरुषोत्तम-दर्शनस्य सारांशः। यो जगन्नाथे अनु-रज्यति स निर्मलो भवति। नैर्मल्यं च जगन्नाथोपासकस्य शेषस्थितिः। इदमेव नैर्मल्यं जीवनमात्रस्य लक्ष्यम्।

निद्रित आकाशो हिमाद्रिः।

कुज्झटिका वाटिकायते। पल्वलस्य परितटे दर्दुररावो भयङ्करः। निष्पुष्टप्रत्यूषे मार्गः अस्पष्टः। पादस्पर्शे नम्रघासाः सर्पायन्ते। चरणं शिशिरीकरोति आद्यो हेमन्तः। शरन्नदी विपथयितुं वदान्या।

पेटिकादिकं सज्जीकृत्य मस्तके निधाय च यानस्थानं पुरःसरति मुर्मुः। अनुसरतः रजनी वृद्धकुलमणिश्च। मुर्मुस्कन्धे दोलायते मृदङ्गः। रजनीहस्ते इष्टस्थाली। वृद्धस्य करे स्यूतम् दक्षिणकरेण स यष्टिमवलब्ध्य चलति। वृष्टिप्रपातो नीहारजन्यः।

यानस्थाने मुर्मुः चकितः। प्रातः जनसम्मर्दो नास्ति। यथास्थानं यानानि गन्तव्यनिमित्तं स्थापितानि। मर्मु-मनसि तु संभ्रमः। किं कुत्र गच्छेत् इति निश्चेतुं न शक्नोति। सर्वत्र हि प्राकारपत्राणि। यानानामग्रे पश्चाद्भागे च विज्ञापनरूपेण तानि स्थापितानि। सर्वमेतद् विलोक्य तस्य सन्देहोऽभवत्। किं यानेषु प्रचारपत्राणां स्थापने किं अधिकलाभो भवति? कं वा एतत् पृच्छेत्? इदानीं तु प्रतिस्थानं नेतॄणां जनाः। वचनमात्रं ते आक्रमेरन्। पुनश्च अयं जनपदः। अत्र जनाः चतुराः। निमेषमात्रं ते नयने धूलिं निक्षिप्य पलायेरन्। भद्रा अत्र चौराः। रक्षकाश्च तस्कराः। को वा विश्वासभाक्? स मान्यमार्गपृच्छायाम् इतस्ततो निर्दिशन्ति। गुरुतरविषये किं न कुर्युः?

एवं विचारे मुर्मुः याने उपविष्टः। पार्श्वे वृद्धपितरं भगिनीं च उपावेशयत्। पुरीमभ्यगमन् यात्रिणः।

निर्वाचनप्रचारे जनपदवायुमण्डलं नितरामुष्णम्। शम्पा अभियाने अभिमानिनी। भंगीषु तस्या न वराभयमुद्रा अपितु अञ्जलिः शोभते। जनतानिकटे तस्याः प्रार्थना। प्रार्थनायां विषयो विजयः। नात्मनः अपितु विलासस्य। विजयार्थं नीतिदुर्नीत्योः विचारो नाम मूर्खता। येन केन उपायेन विजयार्थं जनता बोद्धव्या—प्रचोदयितव्या —आयत्तव्या—। शिक्षितः चतुरः। तस्य स्वार्थनिमित्तं स यतते। साधारणवचने स आत्मानं न विस्मरति। अतः प्रतिपक्षस्य दौर्बल्यं चरित्रसंहारश्च तत्कृते विचारणीयं वस्तु भवति। अनेनैव माध्यमेन जनपदस्य शिक्षिता उद्बुद्धा भवन्ति। गुणं विहाय दोषमेव स्वीकुर्वन्ति। पुनश्च प्रतिश्रुतिभिः ते वशीभवन्ति। सामान्यजनानां कृते

अर्थविनियोगः पर्याप्तः। इत्थं बहुविधयोजनासु अवगाह्य शम्पा सहयोगिनीभिः सह संचरति।

निर्वाचनप्रचारस्य शेषपर्याये शम्पा पीड़िता। विलासस्य गृहे सा एकाकिनी। परिचारकः सेवते। किन्तु सा निःसङ्गतामनुभवति। विलासो बहिर्भ्रमति। निर्वाचनविषये इतस्तत आत्मानं व्यापारयति। कुत्र मन्त्रयति। कुत्र पार्श्वचरान् नियोजयति। अतः गृहमागन्तुं न शक्नोति। शम्पायाः अवस्थां जानन्नपि स तत्समीपे स्थातुं न शक्नोति। शम्पाया दुखं तु वर्धते। सर्वे स्वार्थिनः। सर्वे निजसौविध्यं कांक्षन्ते। असमये न कश्चित् सहायते। निशान्तकथा सम्प्रति मानसमायाति। स यद् वा भवतु, प्रियतमाया एतादृशीमवस्थां न सहते। रात्रौ निद्रां विहाय तथैव निकटे उपविशति। करचरणं सम्मर्दयति। वारं वारं च प्रयोजनीयं पृच्छति। प्रतिनिमेषं बोधयति। नानाकथामुखेन मानसं प्रसादयितुं यतते। इत्थं तन्निकटे कतिपयरजन्यो व्यतीताः। दिवसाश्च पीड़ाविहीना आसन्। इदानीं तु निर्वाचने विलासस्य रतिः। अनेन स यशस्वी भवितुं चिन्तयति। किन्तु श्रमः अन्येषाम्। अधिकारी तु फलस्य स एव। केयं चिन्ता····?

शम्पा पुरुषात् पुरुषान्तरमभजत्। तथापि सन्ततेः मुखं नापश्यत्। एतदर्थं न सा दुःखिनी। कुमारीकाले सा हि गर्भविनाशं कृतवती। सा शिक्षिता—सभ्या—। जनसंख्यावृद्धिविषये सा सम्यक् जानाति। अद्यत्वे जनसंख्यावृद्धिरेव सकलदुःखस्य कारणम्। एतद् विज्ञाय तया अनेकाः प्रतिबोधिता—प्रचोदिता अपि। जनसंख्याया ह्रासनिमित्तं बहुत्र सा भाषणं कृतवती। परमद्य तस्या भाषणस्य मूल्यं नास्ति। न वा निजकर्मणः फलमस्ति। गर्भविनाशः तन्निकटे वैधः। परं सा अनुतप्ता। भावावेगे सैव प्राचीना आकांक्षा तामिदानीं कवलीकरोति। सा पीड़ामनुभवति। सा यन्त्रणायां ज्वलति। सा जीवनस्य व्यर्थताम् अनुभवति।

यौनसम्पर्कं निमित्तीकृत्य कुमारीकालत इदानीं यावत् तत्कृते कुत्साया समाप्तिः न भवति। किन्तु तस्या मनसि स एव प्रश्नः—यौनसम्पर्के किं नारी एव कलुषिता भवति? तस्या मर्यादा नश्यति? सैव पतिता भवति? किन्तु कलुषस्य मार्गं निर्माति कः? गुप्तसंभोगस्य नीड़ं रचयति कः? प्रगतिनाम्ना व्यभिचरति कः?

समाजेऽस्मिन् नारी न कदाचित् प्रगतिशीला भवितुमर्हति। पुरुषो हि राक्षसः। येन केन प्रकारेण तां ग्रसितुं सन्नद्धः।

प्रतिपदार्थमेका तमोदिशा वर्त्तते। किन्तु प्रकाशदिगेव दृग्-गोचरा भवति। इयं च पर्याप्तेः पर्यायवाक्। एतन्निमित्तं सन्तुलनं तु नश्यति। जनो हि विचारयितुं न प्रभवति। अतः अशान्तिः प्रशास्ति। सम्पर्के दूरत्वं दीर्घायते। परिवारो नश्यति। जीवनं वृथाऽनुभूयते। दिगियं हि मरीचिका।

इत्थं चिन्ताबाहुल्ये शम्पाया मनः अधिकं विकृतं भवति। सा प्रजल्पति····विलपति - विलपति····आत्मानं निन्दति। पीडाऽतिशयमनु भवति। किन्तु तस्याः प्रलापं श्रोतुं न कोऽपि निकटे वर्त्तते। परि-चरस्तु परिचर एव।

आशङ्कायां विलासो व्याकुलः।

निर्वाचनेऽस्मिन् पराजयः सुनिश्चितः। पार्श्वचरा विश्वासघातमकुर्वन्। सहचरा ईर्ष्यालवः संजाताः। अधीनस्थाः असहिष्णवः अभूवन्। अर्थलोभिनः कर्मकरा उदासीना अभवन्। अनेकत्र कार्याध्यक्षाः अधीक्षकाश्च प्रतिपक्षं समर्थ्य जनान् प्राचोदयन्। अर्थेन विश्वस्ताः क्रीताः। पक्षजना विषकुम्भपयोमुखनीतिमन्वसरन्। अत इतिहासः कलुषितः। तस्य च पुनरावृत्तिः अवश्यम्भाविनी भवति।

तथापि विलासः प्रत्याशी। यया कया वा रीत्या अग्रे-सरणीयः। प्राचुर्यम् आवश्यकम्। सम्पत्तिः संरक्षणीया। वञ्चनैव समृद्धये अकृष्टसरणिः।

शङ्कामंकुरयति प्रहरः।

विलासस्य उद्वेगो वर्धते। निर्वाचनस्य फलमद्य उद्घोषितं भवति। कति पार्श्वचराः परिवेष्टिताः। घोषणास्थले च उपस्थिताः केचन आत्मीयाः आत्मनः स्पन्दनं गणयन्ति। कपोले करं निधाय विलास उपविष्टः। अन्येषां मुखे नैराश्यं जृम्भते। कति सहचरा आश्वास-यन्ति। पुनः केचन सान्त्वयन्ति। परं विलासो बोद्धुं न प्रभवति।

मुखेन स हसति । हृदयेन खिद्यति । नयनेन केवलं पश्यति । मुखमण्डले तस्य वैफल्यारोहः क्रमशः स्पष्टीभवति ।

पूर्णतया निर्वाचनस्य फलम् उद्घोषितम् । प्रतिपक्षस्य जयघोषे दिङ्मण्डलं प्रकम्पितम् । प्रतिमार्गं विस्फोटकैः ध्वनिसंकुलमभूत् । प्रतिपक्षस्य जययात्रा विलासस्य गृहनिकटे व्यसनमतनुत । प्रतिपक्ष-स्पर्धी पुष्पमाल्येषु सर्वेभ्यो नमोवाकं व्याहरत् । वाद्यनादैः आलोक-सज्जायां च रात्रिः शरत्सुन्दरी संजाता ।

विलासः पराजितः ।

रात्रिः गम्भीराऽभवत् । समवेदना समनन्तरं परिजनाः प्रस्थिताः । विलासः अन्तःप्राविशत् । शम्पा सुप्ता वर्त्तते । ज्वराशयेन सा मूर्च्छिता इव । विलासः तन्निकटे उपाशित् । तस्या शरीरोपरि करं संचाल्य ज्वरतापं निरीक्षितवान् । शनैश्च समबोधयत् । किन्तु सा न प्रत्युदत-रत् । विलासः तां दुःखयितुं नैच्छत् । शनैरुत्थाय निजशय्यामागच्छत् । मनो भाराक्रान्तम् । हृदयं क्लिन्नम् । चिन्ता च क्रमशो बहुगुणिता भवति ।

किन्तु निशीथे को वा सान्त्वयितुं समागच्छेत् ? केन सम्बन्धेन वा कश्चित् आत्मीयतां पुरस्कुर्यात् ? आधिं को वा प्रक्षालयेत् ? नारी वा—? नरोत्तमो वा—? अद्य नयनाग्रे रोजा हसति । विकृतमुखेन सा तस्य उपरि ष्ठीवति । दोषान् उपस्थाप्य सा भर्त्सयति । दुर्बलमुहूर्त्ते रोजा उपगता । प्रतिश्रुतिषु स्नापिता । सबल प्रहरे च परित्यक्ता । पराजयमुररीकृत्य श्वः शम्पा अपि अभिशपेत् । व्यभिचारमारोप्य निन्देत् । भ्रष्टवृत्तिमुपस्थाप्य पुनः दूषयेत् । का वा अन्या समानुभवं प्रकटयेत् ? रजनी—? भगिनी—? सा किमर्थं स्मरेत् ? तस्या वा कः संपर्कः अद्यत्वे ?

विनिन्द्रनयने रजनी विगलिता ।

अपरेद्युः शम्पा मनाक् स्वस्था । दुर्बलशरीरे मनसि च विलासस्य पराजयो न तथा प्रभावमातनोति । परिचरतो निखिलवृत्तान्तं निशम्य

सा गम्भीरा। विलासो विषण्णभावेन शम्पामुपगतः। पार्श्वे उपाविशत्। शनैः अपृच्छत्।

— उपशमः किंचित्····?

शम्पा केवलं तमपश्यत्।

विलासः पुनरपृच्छत्।

— खिन्नाऽसि····?

शम्पा दृष्टिमवानमयत्।

विलासो विचार्य अवदत्।

— मन्ये, पराजयवार्त्ता श्रुता····।

शम्पा दृष्टिमुत्थापितवती। नयने तस्या अश्रु। शीर्णमुखे कातरभावः। अधरे अनपेक्षितः कम्पः।

तस्या लोतकमपमृज्य विलासः अहसत्।

— अयि····! वैफल्यं तु जीवनस्य नावान्तरम्। किमर्थं चिन्ता? किं निर्वाचनमस्माकं सर्वस्वम्? एतत्तु अस्मत्कृते क्रीडा एव। क्रीडायां कश्चित् जयति। कश्चिच्च पराजयते। दुःखार्थमत्र अवसरः कियान्? धनहानिनिमित्तं वा चिन्ता? अयि! उपार्जननिमित्तं नाना दिशः सन्ति। अस्मत्कृते किमपि वा गोप्यमस्ति? किं वयमसमर्थाः? त्यज, दुर्भावनां परित्यज। आगच्छ—।

शम्पामुथाप्य विलासः सभाजनप्रकोष्ठं नयति। समयेऽस्मिन् पत्रदो दूरभाषपत्रमेकं प्रासारयत्। पत्रमिद न कदाचित् अभिनन्दनस्य। नूनमेतत् किमपि गुरुत्वपूर्णमिति विभाव्य शम्पा अनुरुद्धवती।

— पठतु····।

पत्रमुन्मोच्य विलासो निर्वाक्। शम्पा साश्चर्यम् अपृच्छत्।

— किमिदम्?

— अशुभेयं वार्त्ता।

— किमभवत्—?

— अधुना विषयेऽस्मिन् चिन्ता न कर्त्तव्या।

— कथयतु नु?

शम्पा अधीरा अभवत् ।

विलासः पत्रमदर्शयत् ।

शम्पा उन्मादिनी इव प्रालपत् ।

— किं निशान्तो मृतः —दिवंगतः—। पञ्चत्वं प्राप्तवान् — निशान्तः—? सोऽयं निशान्तः——?

इत्थं विह्वलभावेन प्रलप्यविलप्य च शम्पा मूर्च्छिता । तामुत्थाप्य विलासः शयनकक्षं समानयत् । चिकित्सकं च दूरध्वनिना आकारितवान् । परिचरा यथोपदिष्टमसेवन्त । चिकित्सकः समागतः । अभयवाणीं श्रावयित्वा स प्रस्थितः । शम्पायाः दौर्बल्यमेव मूर्च्छायाः कारणमिति सिद्धान्तिम् ।

विलासस्य विश्वासे संप्रति न नारी न वा ईश्वरो लक्ष्यनिमित्तं ध्रुवायितुं शक्नोति । मनुष्य एकाकी । स पशुः । स कीटः । वंशवर्धननिमित्तं केवलो जीवः—दुर्बलः—अविश्वस्तः—अधमः—विचारशून्यः—। इत्थं दुश्चिन्तयन् विलासो मद्यगन्धे आत्मानं स्नपयितुमारब्धः । आरक्तनेत्रेण विश्वं द्रष्टुमारभत । विश्वस्य ध्वंसकामनया केवलं मद्यमपिवत् ।

कार्त्तिकमासोऽयं समुपासकः ।

शीतप्रवाहः प्रारम्भिकः । अतिप्रत्यूषे स्नानं विधाय तूलसीमूले व्रतमाचरति रजनी । चित्रचयेन सा तुलसीं सज्जीकरोति । दीपं दीपयति नैवेद्यमर्पयति । आचमनीयं विदधाति । आरात्रिकं दर्शयति । नामानि जपति । ततो नमस्करोति । पूजाप्रारम्भं समापयति ।

ततः कुलमणिः पुराणपाठमारभते । रजनी मननं करोति । मुर्मुश्च शृणोति । पठनसमये आवश्कीयं बोधयति कुलमणिः । पलितवचसि तस्य नेत्रं निमील्य रजनी विलीना भवति । श्रावं श्रावं मुर्मुश्च दुरितनाशं कामयते । अध्यायं समाप्य पूजाम् उपरमरयति वृद्धः ।

मुर्मुः हविषान्नं प्रस्तौति ।

कुलमणिः विश्राम्यति। रजनी जपे निमज्जति। एकस्मिन् प्रकोष्ठे जनत्रयस्य कर्माणि पृथक्। तथापि संहतिः सम्यक्। मुर्मुः पचति। सकल कर्माणि च निभालयति। अतः तस्य चिन्ता—रजनी किमर्थम् उपास्ते ? किं वा पुनः उपलब्धुम् अवशिष्यते ? क्रमशो वय उत्तीर्यते। शरीरं च शीर्यते। प्रभुकृपया को वा तथा पुरुषः रजनीं कामयेत ? को वा आगम्य स्वेच्छया विवाहं कुर्यात् ? नारीजीवने एतद् विहाय किं वा पुनः सुखम् ? उपासनायां तादृशं सुखं कुतो वा लभ्यते। यदि वा सा पतिमङ्गलमिच्छति तर्हि तस्य जीवनसमये किमर्थं न कृतवती ? मरणोत्तरविधाने किं वा भवेत् ? मुर्मुः व्यथितो भवति।

ग्रामं विहाय नगरे स्थित्वा मुर्मुः प्रसन्नः। संप्रति तस्य दृष्टि-भंगी परिवर्त्तते। अतः स भोजनादिकं समाप्य विश्रामसमये नगरस्य मार्गेषु वीथीषु च संचरति। अभिनवानि वस्तूनि पश्यति। जनानां चलने चमत्कृतिं लक्षयति। अतः सोऽपि इच्छति—कार्त्तिकमासानन्तरं उभयं गृहे परित्यज्य नगरेऽस्मिन् नूतनवृत्तिमन्वेषयिष्यति, अत्रैव जीवनं निर्वाहयिष्यति। नगरस्य सौख्यम् अनुभविष्यति।

क्रमशो नगरस्य परिक्रमायां मुर्मुः विमुह्यते। तस्य सिद्धान्ते नगरमेव सुखस्य स्थलम्। एतदर्थं विलासभ्राता ग्रामं परित्यक्तवान्। नगरे स सम्मानस्य अधिकारी अभवत्। जनानां नेता संजातः। पुष्कलं धनं संगृहीतवान्। यदि निकटे धनं तर्हि अन्नं मिलिष्यत्येव। एवं विचिन्त्य मुर्मुः। दिवसान् गणयति—कदाऽयं मासः समाप्तिं यास्यति ?

कुलमणिः जगन्नाथदर्शने व्रती।

दर्शनं नाम अनुभवः। अनुभवे तु प्रतिमा माध्यमभूमिः। अयमनुभव आत्मानुभवः। आत्मा जीवसज्ञायां परिच्छिन्नः। परिच्छिन्नपरिधिरत्र तस्य आलयः। महालयस्तु व्याप्तिमान्। स इह चराचरस्य गृह-विशेषः। अन्तकरणस्य आलोके न कश्चिदेनम् अभिजानाति।

कुलमणेरनुभवे तु न तीर्थजलं न वा कर्मफलमद्य प्रभावं तनुते। सर्वमिह समतलम्। महालयस्य विकृतहिल्लोलम्। जन्ममरणप्रपञ्च-नाम्ना सर्वमिदं विकलम्। महालयस्य तत्त्वं तु सदैव निर्मलम्।

शीतस्नाने वृद्धस्तु जीर्णः ।

जीवनदर्शने तथापि उट्टङ्किता भवति तस्य काचित् मानविकीः दुर्बलता । स पुत्रवान् अपि अपुत्रिकः । स्रष्टा व्यथितो भवति । सृष्टिः हि तदनुगामिनी न भवति । सृष्टिरपि आपेक्षिकतया स्रष्टा भवति । सा वा किमर्थं निजकारणस्य अनुगामिनी स्यात् ? स्रष्टा तु एतद् बोद्धुं न प्रभवति । कुलमणेः दौर्बल्यस्य अन्तराले विलासः पुनरपि स्मृतिं रुणद्धि । अनुभवे मुर्मुः रहस्यं संचिनोति । वात्सल्ये कुलमणिस्तु मुर्मुविलासयोः पार्थक्यं न पश्यति ।

तथापि विलासो निजकैन्द्रिकः ।

अद्यत्वे सभाजनप्रकोष्ठे स उपविशति । वातायने केवलं पश्यति । प्रतीक्षते च कश्चित् आगमिष्यतीति धिया । आगम्य जनाः तस्मिन्नेव पथि अपसरन्ति । विलासस्तु पूर्वाभ्यासवशात् प्रातरेव स्नानादिकर्म समाप्य प्रतीक्षते । वृत्तपत्रं पठति । मनाक् वाचयति । मनाक् च बहिः पश्यति । बहिरागम्य इतस्ततो निरीक्षते । ततः प्रतीक्षते । परं न कोऽपि कातरतां विज्ञापयितुमुपैति ।

यदा स पूर्वाभिजात्यं मनस्यन् उपनेत्रं परिधाय उपविशति तदा प्रविशति । तदा प्रविशति कश्चित् उत्तमर्णः । स विरक्तभावेन वदति ।

— किमर्थं भवान् ऋणपरिशोधं न करोति ?

विलासो नतस्वरेण बोधयति ।

— किंचित् प्रतीक्षताम् । नूनं परिशोधो भविष्यति । अस्माकं व्यापारः किम् एतावति समाप्तः ?

— कोऽस्य व्यापारः ? भवतो वाणिज्यसंस्था तु नष्टा । शिल्पसंस्थानां द्वाराणि पिहितानि । किं पुनः भवान् प्रतिश्रृणोति ?

— इदानीमस्मिन् जनपदे व्यापारनिमित्तं न मे मनः । अन्यत्र व्यवस्था क्रियते । अतः परिशोधं विलम्बो भवेत् । न किमपि चिन्तयतु भवान् ।

उत्तमर्णः प्रतिष्ठते । मनः संयम्य विलासो दीर्घतरं निश्वसिति । कपालतः स्वेदम् उत्प्रोञ्छति ।

किन्तु मुक्तिः कुत्र ? इत्थमनेके उत्तमर्णाः सन्ति । ते लाभाशया एव ऋणं दत्तवन्तः । ते वणिजः । तेषां वाणिज्यनिकटे कस्यचित् न कश्चित् सम्पर्कः । सर्वे ग्राहकाः । सर्वेषां कृते वञ्चना मिथ्या च इति सम्पर्कस्य माध्यमद्वयम् । मुखे हास्यम् । वचने मधुरमिथ्या । कर्मणि प्रतारणा । ततो वाणिज्यम् । अनया रीत्या राजनीतिरपि साधारण-जनानां कृते अपरजीविका संजाता । उद्योगपतीनामपि एषा अपरा सरणिः । अतस्ते निर्वाचने धनं विनियुज्य उत्तमर्णा भवन्ति देशस्य··· समाजस्य···जातेः··· व्यक्तेश्च ।

विलासः चिन्ताव्याकुलः ।

अपर उत्तमर्णः समागतः । दर्शनमात्रं स भर्त्सयितुमारब्धः ।

— अहो, उत्तमभद्रः···? धनविषयो विस्मृतो वा ? भवतः पराक्रमो ज्ञात एव । पुनः कथं विलम्बः ? शीघ्रमर्पयतु । अन्यथा महती हानिर्भवेत् ।

— उपविशतु···। चायं गृह्णातु ।

— न हि । न मे समयः । त्वर्यताम्····।

— अरे ! शृणोतु····। उपविशतु नु—।

— उक्तं किल समयो नास्ति ।

— इदानीमन्यत्र मे संस्था उद्घाटिता भवेत् । तदर्थमहं व्यापृतः । अन्यदा भवान् आगच्छतु ।

— का सा संस्था उद्घाटिता भवेत् ? भवतो गृहमिदानीं तु अपरहस्ते । तस्या कृपया भवान् अत्र निवसति । अन्यथा———।

— अधिकं न जल्पतु । यथासमयं ऋणधनं दास्यते । भवान् गच्छतु ।

विरक्तभावेन उत्तमर्णः प्रतिष्ठते । चिन्ताकुलो विलासः अन्तः प्रविशति । मद्यकूपीम् उन्मोचयति । आकण्ठं पिबति । शय्यामधिशेते । व्यजनीं चालयति । नेत्रं निमीलति ।

मासः समाप्यते ।

महालयाश्राद्धं समाप्य कुलमणिः निश्चिन्तः । इदानीम् आकाशदीपं सज्जीकरोति रजनी । तुलसीमूले वंशदण्डं संस्थापयति मुर्मुः । तदग्रे रज्जुं सन्निवेश्य दीपस्थापनार्थं पात्रं रक्षति । पात्रं च चित्रयति

रजनी। तत्र दीपं निधाय सा पूजनमारभते। मनसि रहस्यमातनोति श्रीकृष्णप्रतिमा। दीपाग्रे शिखातालं तुलयति अग्रिमकामना। शिखावलये पात्रधारेण समं रेखायते प्रकाशः। पात्रावरणस्य छिद्रराशिः ज्योतिर्मयः। रज्जुमाकृष्यति मुर्मुः। दीपपात्रम् उर्ध्वमुत्तिष्ठते। ततो वंशाग्रे दोलायते आकाशदीपः। रज्जुं सतर्कतया वंशखण्डे बध्नाति मुर्मुः। ऊर्ध्वं पश्यति रजनी। नेत्रकोणे तस्या अश्रु कर्णमूलं स्पृशति। मुर्मुः प्रणमति। पूजां समापयति रजनी। श्वेतविभां विकीर्य सा अन्तः प्रविशति।

वृद्धस्तु रुग्णः।

तद्रात्रौ स मुर्मुमाहूय उक्तवान्।

— मुर्मो—! तव सेवया अहमतीव प्रीतः। त्वदर्थं प्राग् यथा मे स्नेह आसीत् इदानीमपि तथा वर्त्तते। किं वा अधिकं वदिष्यामि ? विलासः चिराय दूरं गतः। न स कदापि प्रत्यागमिष्यति। त्वं तु मम पुत्रादपि अधिकः····मम आत्मा—। त्वां विहाय न मे स्थितिः। इदानीं तु अनुभवामि—अधिकं मे वयो नास्ति। आयुः क्षीणतरम्·····।

वृद्धो हताशः।

मुर्मुः सविनयम् अनुरुद्धवान्।

— कथयतु—। न किमपि चिन्तयतु—। सर्वं कर्त्तुम् अहं सन्नद्धः।

वृद्धः शनैरवदत्।

— पश्य—। मत्तः परं रजनी मे एकाकिनी इति भावना आसीत्। किन्तु त्वं वर्त्तसे इति सा भावना अपगता। स्वेच्छया रजनीदायित्वं त्वमेव गृहीतवान्। इतः परं गृहं मम तवैव। पुनश्च या काचिन्मे सीमिता सम्पत्तिः वर्त्तते तत्र अधिकारी त्वमेव।

मुर्मुः चकितः।

— मैवं कथयतु। अहं पालितः। दायत्वेन सम्पत्तिः मम कथं भवेत् ? सम्पत्तेः अधिकारिणी भगिनी रजनी अस्ति। अधिकारी च भ्राता विलासो वर्त्तते। कथमेवं प्रजल्पति भवान् ?

— नहि···, मुर्मो ! रजनी इदानीं न स्वभावापन्ना। सम्पत्तेः रक्षणं न तया सम्भवेत्। अपरं तु तस्या रक्षणार्थमन्यस्य आवश्यकता।

विलासो भ्रष्टः। स पतितः। पित्रर्जितसम्पत्तिः यदि तस्य करे निपतेत् तर्हि तस्याः सदुपयोगो न भवेत्। पुनश्च यदि अपात्रे दायो निपतेत् तर्हि ममात्मा शान्तिं न प्राप्नुयात्। नाऽहं सद्गतिं प्राप्नुयाम्। त्वं मम पुत्रः····मम आत्मा····।

वृद्धस्य प्रगल्भवाचा मुर्मुः आश्चर्यान्वितः।

अतिकातरभावेन स विनयी अभूत्।

— किमर्थं भवान् मार्गं विस्मरति।

वृद्धः किंचित् अभिमानी संजातः।

— मार्गनिश्चयो मदुपरि···नैतत्तो दायित्वम्।

मुर्मुः नम्रः।

कुलमणिः अबोधयत्।

— पुत्र -! एकः अनुरोधो मे त्वन्निकटे। निभालयितुं शक्नोषि ?

— नूनम्····। निःसंकोचं कथयतु।

वृद्धः गम्भीरः।

— मम मरणे मुखाग्निं त्वमेव दास्यसि। पुनश्च अस्थिसंग्रहकाले बाल्यात् लालितामिमां मस्तकशिखां संचेष्यसि। ततः शिखां, जपमालां च आदाय गङ्गानद्यां निक्षेप्स्यसि। यद् वा अवशिष्टं पूजाद्रव्यादिकं, इष्टप्रतिमां, मातृकां च ग्रामपार्श्वनद्यां वर्षाकाले विसर्जयिष्यसि।

कुलमणिः किंचित् कम्पितवाक् संजातः। ततः स्थिरतया निविष्टः। मुर्मु-मनसि वागियं प्रहेलिका। किमर्थं वृद्धः बाल्यात लालितामिमां शिखां गङ्गागर्भे निक्षेप्तुमादिशति ? कथं पुनः प्रतिमादिकं विसर्जयितुं प्रेरयति ? का वा योजना अन्तराले ? का वा चिन्ता वृद्धस्य एतादृशप्रवृत्ति नियमयति ? को वा एतादृशो मन्त्रो यं वृद्धः निह्नोतुमिच्छति ? एवं मुर्मोः अन्वेषणप्रवृत्तितले रात्रिः संप्रस्थिता।

परदिने सर्वे गृहं प्रत्यागताः।

सप्ताहाभ्यन्तरे वृद्धस्य स्वास्थ्यमधिकतया अवनतम्। स शय्याशायी संजातः। मुर्मुः औषधिसंग्रहे व्यापृतः। रजनी पितृसेवायां आत्मानं

नियोजितवती। तस्या जपनेपथ्ये पितुः शीर्णता विषादम् अभरत्। अवश्यमरणमाशंक्य मुर्मुः हतप्रभः संजातः। दीपशिखातले तमसा आच्छन्ना। कुलमणिः दिवंगतः।

अन्त्येष्टिसंस्कारे मुर्मुः मुखाग्निम् अददात्। पलितकेश-पार्श्वतः सयत्नं स वृद्धस्य शिखां समचिन्नोत्। कुलमणिः चितायां भस्मसात् अभूत्। मुर्मुः निजबाल्यं स्मरन् भृशं व्यलपत्। सजल-नयना रजनी जपप्रवाहे स्वप्नसंकुला आसीत् नैन छिन्दन्ति शास्त्राणि··· नैनं दहति पावकः·····।

विषण्णदिवसा गतानुगतिकाः।

विलासः पितुः मरणवार्त्तां लब्धवान्। तदानीं स मुक्तभावेन अहसत्। मद्यकूपीत आकण्ठमपिवत्। आरक्तनयने तस्य पितुः सम्पत्तिरेव अभासत। स त्वरया ग्रामाभिमुखी अभवत्।

विलासस्य दुष्प्रवृत्तिं सम्यग् ज्ञातवती शम्पा। सा पुनः पुनः तं न्यषेधत्। अनेकवारं च वारितवती। परमेकदा सम्पदाशया स ग्राममागतः।

मुर्मुः कार्यलग्नः।
सहसा विलासं निकटे विलोक्य स विस्मितः। पितुः मरणात् परमद्य कति मासा व्यतीताः। किन्तु वार्त्तां प्राप्याऽपि यथाकालं स नागतः। अद्य किमर्थम्? मुर्मुः पुरः आगच्छत्। सविनयं च प्राणमत्। तस्य अवस्थां दृष्ट्वा नितरां व्यषीदत्। शनैश्च अपृच्छत्।

— विलासभ्रातः! भवान्···?

— जाने सर्वम्·····।

— कथं नागतवान्?

— मां पुनः प्रष्टुं कदा प्रभृति ते अधिकारः?

— प्रश्नेऽस्मिन् अधिकारकथा कुतः?

— त्वमत्र अधिकारी संजातः। सम्पत्ते प्रभुः संजातः किल?

— को वदति?

— सर्वे वदन्ति।

प्रमाणीकरोतु---।

— प्रमाणस्य का आवश्यकता ? यन् मे पिता ते प्रदत्तवान् तत्सर्वं समर्पय। पुनश्च यद् अधिकारपत्रं स ते दत्तवान् तदपि देहि ।

— धनम्---? अधिकार पत्रम्---? किमेव वक्ति भवान् ? क इत्थं भवन्त-मुक्तवान् ?

— नाऽहं किमपि श्रोतुमिच्छामि । सर्वं मे समर्पय ।

— किं वा मन्निकटे वर्त्तते ? सर्वं तु भवतः । भवान् दायित्व गृह्णातु । अहं सद्यः प्रस्थानं करिष्यामि ।

— न ते मुक्तिरधुना । यन् मे पिता त्वन्निकटे स्थापितवान् तत् सर्वं मे देहि । ततो यथेच्छं गच्छ ।

— किं भवान् प्रमत्तः संजातः ?

— विरम ---। त्वर्यताम्---।

— कमत्र रक्तनयनं प्रदर्शयति ?

— त्वामेव---। माऽधिकं चीत्कुरु । बहुचीत्कारो मया श्रुतः । त्वर्यताम्---।

— नहि---।

— नहि---? नहि---?

एवं गर्जन् विलासः तदुपरि चपेटाद्वयं प्राहरत् । मुर्मुः स्थिरः संजातः । सुदीर्घं निश्चयस्य आत्मानमवदत् ।

— दीर्घतरसेवायाः किमिदं मे पारितोषिकम्---?

स त्वरया गृहं प्राविशत् । लघुपेटिकामेकामानीय उपस्थितः । उच्चैश्च अवदत् ।

— नयतु---। इदं धनम्------।

ततः स पेटिकामुन्मोचितवान् । ततः प्रादर्शयत् ।

— नयतु---। इयं जपमाला---। इयं च पितुः पलितशिखा---। इमानि पूजाद्रव्याणि---। अयम् इष्टदेवः । इयं च मातृका । नयतु सर्वम् । गङ्गाजले विसर्जयतु । इदं पितुः अधिकारपत्रम् । इदं च धनम् ।

उभयस्य कलहध्वनिं निशम्य रजनी पूजागृहात् उत्थाय द्वारमुपगता । करे जपमाला । कपाले चन्दनरेखा । चरणे मन्दगतिः । समग्रशरीरे श्वेतवसनस्य प्राच्यविभा । मन्थररीत्या सा अपृच्छत् ।

— अरे, मुर्मो···! किमर्थं चीत्करोषि ?

— विलासभ्राता समागतः ।

— कुत्र ? न दृश्यते – ?

— अत्र दण्डायमानः पितुः सम्पत्तिनिमित्तम् आगतः ।

— अहो···व्यामोहः···!

रजनी नेत्रमुत्थाप्य विलासम् अपश्यत् । विकृतमुखेन विलासः चकितः प्रतीयते । रजनीदृष्टिस्तु प्रतिक्रियाविहीना । मन्दगत्या सा विवर्त्य गृहं प्राविशत् । मुर्मोः भक्तिपूतमनसि सा केवलं निरीहा··· एका प्राचीनतापसी···।

विलासो लज्जितः ।

प्रतिशोधकामनया स एकवारं गृहमपश्यत् । एकवारं च मुर्मुमुखम् अपश्यत् । ततः पराङ्मुखतया न्यवर्त्तत । उन्मत्तः स चलति । दोलायमाना गतिः । वेगो मन्दः । मुखे यथेच्छजल्पनम् ।

ग्राममार्गे सः अपसृतः । ग्रामवृद्धाः तं निरीक्ष्य विस्मिता अभवन् ।

— किमयं कुलमणेः पुत्रः ??

मुर्मुः बाल्यं स्मरति । कुलमणेः वात्सल्यं मनस्यति । रजन्या उदारतां रोमन्थयति । ततो विलासमनुसरति । ग्रामोपान्ते विलास उपनीतः । तमाकारयितुं मुर्मुः चिन्तयति । तं पुनरपि बोधयितु-मिच्छति । तन्निकटे क्षमाप्रार्थनार्थं वाञ्छति । किन्तु विलासः पुरः सरति । मुर्मुः पुनश्च अनुसरति । तथापि पश्चात् सम्बोधयितुं न प्रभवति । विलासः अग्रे सृतः । मुर्मुः विषण्णतया एकस्मिन् वृक्षमूले स्थित्वा केवलं पश्यति । मार्गान्तरे विलासः अन्तर्हितः ।

वृक्षाग्रस्य कुटिलकुञ्चने दिग्भागः तरङ्गायते । उष्ठस्य स्पन्दनराशिषु मुर्मुः सम्मोहस्य पर्यायं गणयति ।

शम्पा प्रतीक्षते ।

किन्तु विलासो न प्रत्यागतः । बहुत्र वार्त्ता प्रसारिता । सन्देशः प्रेषितः । जना अन्वेषणे नियोजिताः । वृत्तपत्रेषु वृत्तान्तः प्रकाशितः ।

आकाशवाणीषु दूरदर्शनेषु घोषणा कारिता। परिचितस्थानेषु स्वयं शम्पा अन्विष्टवती। तथापि विलासः कुत्र गतः, न कोऽपि वक्तुं प्राभवत्।

अकालवार्धक्ये शम्पा शीर्णा। अद्य तन्निकटे नाऽभिजात्यं न वा अभिमानम्। अभियोगेषु सा तु आत्मानं मथ्नाति। अतीतं स्मरति। नयने अश्रु भरति। अनेकम् अनुतपति। अनेकान् अभिशपति।

तथा च प्रतीक्षते शम्पा।

अनुरणनं सृजति पुरातनस्पन्दनस्य प्रतिध्वनिः।

—: समाप्तम् :—



लेखकस्य कृतयः

१	प्रणयप्रदीपम्	(काव्यम्)
२	हृदयेश्वरी	(कवितासंग्रहः)
३	महातीर्थम्	,,
४	भिन्नपुलिनम्	,,
५	अलका	,,
६	ईशा	,,
७	शीतलतृष्णा	(उपन्यासः)
८	प्रतिपद्	,,
९	निकषा	,,
१०	अरुणा	,,
११	अञ्जलिः	,,
१२	आवर्त्तम्	,,
१३	ऋतम्	,,
१४	मधुयानम्	,,
१५	तिलोत्तमा	,,
१६	शिखा	,,
१७	विसर्गः	,,
१८	शशिरेखा	,,
१९	ॐ शान्तिः	,,
२०	निम्नपृथिवी	(लघुकथासंग्रहः)
२१	दिशाविदिशा	,,
२२	ऊर्मिचूड़ा	,,
२३	पताका	,,
२४	महान्	,,
२५	एकदा	,,

RESEARCH PUBLICATIONS

26 Reference : A Logico-Linguistic Identification
27 Relations in Knowledge Representation
28 Elements of Research Methodology in Sanskrit
29 Social Justice and its Ancient Indian Base
30 Logic of Non-Case-Relationship
31 Logic of Knowledge Base
32 Indian Semantics : A Computation Model

□